माघमासः
वर्षम् – ६९
चतुर्थोऽङ्कः
विक्रमाब्दः २०७५
युगाब्दः ५१२०
५ फरवरी २०१९

ISSN 2249-698X

# भारती

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

## संस्कृत–मासपत्रिका



माघे वसन्तपञ्चम्याः स्वागते गीतिवाद्यकेः।
सरस्वत्याश्च पूजाभिर्हर्षोल्लासः प्रवर्त्यते॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | संस्कृतसमाचाराः | बद्रीप्रसाद शर्मा | ५ |
| ५ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | ६ |
| ६ | देहश्यामपटः ( बुरखा ) | डॉ. ऋषिराजजानी | ७ |
| ७ | संस्कृतसमाचाराः | प्रधानसम्पादकः | ९ |
| ८ | मन्त्राणां शक्तिः | डॉ. हर्षदेवमाधवः | १० |
| ९ | वसन्तपञ्चमी शुभ्रा | डॉ. धर्मचन्द जैन, पूर्व आचार्यः | १३ |
| १० | ग्रन्थगवाक्षः | म.म. देवर्षिकलानाथशास्त्री | १४ |
| ११ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | १६ |
| १२ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १७ |
| १३ | पं. गोपीनाथदाधीचकविवरेण विरचिते........... | भारती शर्मा | १८ |
| १४ | पाण्डुलिपीनां कालनिर्णयः | विनोदकुमारशर्मा | २२ |
| १५ | प्रियभारतं मे | डॉ. फिरोज | २४ |
| १६ | महिलाभ्यः प्रौढशिक्षा | चरनसिंहः | २५ |
| १७ | 'ढूँढाड़ी' लोकभाषायां स्वराणां वर्णनम् | कानाराम कुमावतः | २६ |
| १८ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | २७ |
| १९ | उपमालङ्कारनिरूपणेऽप्पयदीक्षित....... | भोपालरामः रेबारी | २८ |
| २० | गो महिमा | नानूराम जाट | ३० |
| २१ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३१ |
| २२ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

गात्रैः परामृशति यः शरदिन्दुकान्तिम्,
नीलाम्बुजेन तुलिता सुषमा च यस्य।
वृन्दावने विहितयामुनगाङ्गशोभम्,
राधामुकुन्दमिथुनं तदहं नमामि।।

## मासावतरणम्

शीतात् त्राणमुपेतुमेव दिवसे सूर्यं भजन्ते जनाः,
सेवन्ते धनिनः स्वकीयभवने एसीं सुखायात्मनः।
कालक्षेपमथाचरन्ति बहवो दीना जना वह्नितः,
शीताद् भीतिमुपागता युवतयः कुर्वन्ति आलिङ्गनम्।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

माघमासः
वर्षम् 69
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2075
फरवरी, 2019
अङ्कः -4
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# लोकोत्तराणां चरितानि को हि विज्ञातुमर्हति

...✍ पं. प्यारेमोहनशर्मा

यः सप्तवर्षवयस्क एव व्याख्यानकौशलेन महामना इत्युपाधिना विभूषितः स मदनमोहनमालवीयः महापुरुष आसीत्। काशीनरेशाद्दानेन प्राप्तभूमौ दानदातृभिर्धनं लब्ध्वा काशीहिन्दूविश्वविद्यालयमरीरचत्।

पण्डितमदनमोहनमालवीयस्य जन्म प्रयागे दिसम्बरमासस्य पञ्चविंशतितमे दिनाङ्के एकषष्ट्युत्त-राष्टदशशततमे ख्रिष्टाब्दे समभवत्। महामनामालवीयस्य पितुर्नाम पं ब्रजनाथः मातुर्नाम मूनादेवी अवर्तिष्ट। एते मध्यप्रदेशस्य निवासिन आसन् इति कृत्वा मालवीय नाम्ना ख्यातिमलभन्त। एतेषां पितृचरणाः संस्कृतस्य विद्वांसोऽवर्तिषत। ते श्रीमद्भागवतमहापुराणस्य कथाः वाचनेनाजीविकां संचालयन्तिस्म। एतेषां पितामहाः प्रेमधरचतुर्वेदिनोऽविद्यन्त। एते महानुभावा अष्टोत्तरशत-दिनेष्वष्टोत्तरशतवारं श्रीमद्भागवतमजपन्। मदनमोहनः पञ्चवर्षवयस्कः प्रयागे धर्मज्ञानोपदेशविद्याधर्मविवर्द्धि-नीनामके विद्यालये संस्कृतमपठत्। सप्तवर्षवयस्केन बालकेन मोहनेन गुरुवरो देवकीनन्दनः प्रयागे माघमेलायां विदुषां सम्मुखे संस्कृते भाषणमकारयत्।

त्रयोदशवर्षवयस्को मालवीयः संस्कृते ''मकरन्दोपनाम्ना'' काव्यरचनां प्रारभत। एतेषां कविताः पत्रपत्रिकासु प्रायः मुद्रिता अभूवन्, विद्वांसः संस्कृताज्ञाश्च रुचिपूर्वकं ता अपठन्। अष्टादशे वर्षे एतेषां विवाहः पं. नन्दलालस्य पुत्र्या कुन्दनदेव्या सार्धमभवत् परन्तु अध्ययने न कापि बाधा समायाता। इलाहाबाद-विश्वविद्यालयात् (श्योरसेन्ट्रलकालेज) दशमकक्षो-त्तरणानन्तरमेनं हेरिसनविद्यालयस्य प्राचार्यः छात्रवृत्तिं दत्वा कलकत्ताविश्वविद्यालये पठितुं प्रेषयत्। ततः (1884) चतुरशीत्युत्तराष्टादशशततमे ख्रिष्टाब्दे संस्कृते आङ्गलभाषायां च बी. ए. परीक्षामुदतरत्। अर्थिकी स्थितिः दुर्बला आसीत् इति कृत्वा ''फीस'' शुल्कप्रदाने काठिन्यमवर्तिष्ट एतदर्थमसौ बालकान् (ट्यूशन) शुल्कं गृहीत्वा अपाठयत्। संस्कृतेन सह असौ आङ्गलभाषामपि सम्यगध्यगीष्ट। एतेषामाङ्गलभाषायां प्रदत्तेन भाषणेन श्रोतारः मन्त्रमुग्धा जायन्तेस्म। अध्ययनसमाप्त्यनन्तरं अध्यापनकार्यं प्रारभन्त। सर्वकारीये विद्यालये चत्वारिं-शद्रूप्यकाणि वेतनरूपेणालभन्त। परन्तु कानिचिद्वर्षा-ण्यनन्तरमसावध्यापनकार्यमत्यजत्। ततः पत्रकारिताम-करोत्। अस्मिन्नेव समये वाक्कीलतामपठत्।

ततश्चासौ सामाजिके कार्ये संलग्नोऽजायत। भारतरत्नेन विभूषितो हिन्दूविश्वविद्यालयस्य संस्थापको मालवीयो देशसेवायै स्वजीवनं समार्पिपत्। असौ उदारो विनम्रः संयमी स्वाभिमानी महापुरुषोऽविद्यत। तस्य प्रत्येकस्मिन् कार्ये हिन्दूधर्मसंस्कृतिः पूर्णरूपेण व्यराजत।

एते (1818) अष्टादशाधिकाष्टादशशतके ख्रिष्टाब्दे इण्डियननेशनल कर्मणि कांग्रेसस्याधिवेशने दिल्या-मध्यक्षीये भाषणे ''सत्यमेव जयते'' घोषमजूघुषन्। कलकत्ता-विश्वविद्यालयस्योपगुरवः पंडितं मालवीयं ''डाक्ट्रेट'' उपाधिं दातुमैच्छन् परन्तु मालवीयो नोपाधिं स्वीचकार। मालवीयोऽवदत् पण्डितोपाधितोऽधिकं नाङ्गलोपाधिः सम्मानबोधकः। आङ्गलानां ''सर'' उपाधिमप्यसौ न स्वीचकार। असौ देशविभाजनस्य विरोधी आसीत्।

असौ गान्धिनः असहयोगान्दोलने सहर्षं भागमगृह्णात् (1928) अष्टाविंशत्यधिकोनविंशतिशततमे ख्रिष्टाब्दे कांग्रेसनेतृभिः सह साइमनकमीशनस्य विरोधमकरोत्। सम्पूर्णे देशे जनजागरणाभियानं प्राचालयत्। स महात्मानं गान्धिनं स्पष्टमकथयत् यद् देश विभाजनेन स्वतन्त्रता नैव स्वीकार्या।

असौ हिन्दूविश्वविद्यालयाय धनमयाचत। एकदा असौ हैदराबादनगरस्य नवाबसमीपं धनमयाचत् परन्तु नवाबः किमपि दातुं नैच्छत्। ततः मालवीयो बहिरागत्य श्मशाने नीयमानां शवयात्रामपश्यत्। मृतस्य परिजना रूप्यकाणि शवयात्रायां प्राक्षिपन् मालवीयस्तानि रूप्यकाणि उत्त्थाप्य संग्रहमकरोत् जना अपृच्छन् भवान् किमिदं करोति। असावुदतरत् यत् निजाममहोदयस्य कृते लज्जास्पदमिदं कदाचिन्न भवेत् यत् हैदराबादतः रिक्तहस्तो गतो मालवीयः। ततश्च निजामस्तमाहूय विपुलं धनराशि-मयच्छत्। जयपुरस्य महाराजा माधोसिंहोऽपि पञ्चलक्ष-रूप्यकाणि प्रायच्छत्। इत्थं महामनाः कठिनपरिश्रमेण वी.एच.यू. संस्थानमस्थापयत्।

# संस्कृतसमाचाराः




❑ वार्ताहरः बद्रीप्रसाद शर्मा

श्री निम्बार्क वैदिक संस्कृत समित्याः मण्डल-स्तरीय संस्कृतवाङ्मय-पुरस्कार-वितरणं विद्वज्जनानां विद्यार्थिनाञ्च सम्मानसमारोहकार्यक्रमः भीलवाडानगर-स्य आजादनगरस्थितः वैदिकविद्यालयस्य प्रांगणे महन्त-श्रीमन्तः मोहनशरणशास्त्रिणः प्रधानसंरक्षणे आयोजितम्। मुख्यातिथिः भीलवाड़ा जिलाधीश महोदयः श्रीमान् राजेन्द्र भट्ट आसीत् कार्यक्रमस्य विशिष्टातिथी उपप्रधानः केसरसिंहमहोदयः राजेश चौधरीश्च, (आरपीएस) आस्ताम्। सारस्वतातिथिगणेषु आर. एल. नौलखामहाभागः शम्भूदयाल जोशी विश्वास-जांगिड़ महोदयाश्च उद्बोधनं दत्तवन्तः। कार्यक्रमस्य संचालनं समित्याः संयोजकः श्रीमता कृष्णगोपाल जांगिड़ महोदयेन देववाण्यां कृतम् श्री निम्बार्क वैदिक संस्कृत समितिः ब्रह्मलीन महन्त बनवारी शरण तपोमूर्तिद्वारा संस्कृत भाषायाः प्रचार प्रसारार्थं सप्तदशवर्ष पूर्वमेव सुष्ठु संचालिता। कार्यक्रमे आगन्तुकानाम् अतिथीनाम् श्रीमता विरेन्द्र जांगिड़ महोदयेन वाक् पुष्पैः स्वागतम् कृतम्। तेन समित्या वार्षिककार्यक्रमाणां संस्कृतसम्मेलनानां संस्कृतप्रतियोगितानां प्रतिवेदनम् प्रस्तुतम्। कार्यक्रमे विशिष्टातिथिपदमलंकुर्वता प्रशास-निकाधिकारिणा श्रीमता राजेश चौधरीमहोदयेनोक्तम् यत् संस्कृत भाषैव सर्वासां भाषाणां जननी अस्ति अस्याः भाषाया एव अन्यभाषाणामुत्पत्तिः अभवत्। तैरुक्तम् यत् संगणकस्य कृते सर्वत्र संस्कृत भाषा अन्यभाषापेक्षया उपयुक्ता वर्तते। अस्मिन् कार्यक्रमे अजमेरमण्डलस्य विंशत्यधिकशतं परिमिताः शिक्षकाः द्विशतं परिमिताः संस्कृत छात्रछात्राश्च प्रशस्तिपत्रेण पारितोषिकेण च मंचे सम्मानिताः। अस्मिन् संस्कृतसम्मानसमारोहे राजस्थान-स्य विभिन्न मण्डलेभ्यः अनेके संस्कृतानुरागिणः आगतवन्तः तेषु ब्यावरमण्डलस्य प्रभारी बद्रीप्रसाद शर्मा आसीन्द मण्डल प्रभारी दीपक शर्मा पाली मण्डल प्रभारी श्वेता दाधीच महोदयः च उपस्थिता आसन्।

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्ण:शरणं मम )

( पूर्वानुवृत्तम् )

❑ आचार्य पं. नथमलशास्त्री दाधीच:

चित्तवृत्तिनिरोधो मे कृष्णपादाम्बुजे सदा।
कृष्णे मे मनसो योग: श्रीकृष्ण: शरणं मम।। 291।।
सर्वेषां श्रेयसां हेतु: सर्वाघौघविनाशन:।
अन्त:स्थो मे सदा कृष्ण: श्रीकृष्ण: शरणं मम।। 292।।
भावितोभावुकैर्भक्तैर्धारणाध्यानमङ्गल:।
कृष्णश्चैकोऽखिलाधार: श्रीकृष्ण: शरणं मम।। 293।।
भजतां भावसम्प्रीतस्तपतां त्यागिनां तप:।
यज्ञो हि यजतां विष्णु: श्रीकृष्ण: शरणं मम।। 294।।
कृष्ण: संकीर्तितो ध्यात: पूजितश्चावृत: श्रुत:।
हृदिस्थ: सर्वपापघ्न: श्रीकृष्ण: शरणं मम।। 295।।
आपन्नो म्रियमाणश्च विपन्न: पापकृत्तम:।
कृष्णनाम स्मरन्मुक्त: श्रीकृष्ण: शरणं मम।। 296।।
सत्संगाद्भक्तिभावाच्च कृष्ण कृष्णेति कीर्तनात्।
मुक्तसङ्गो व्रजेद्धाम श्रीकृष्ण: शरणं मम।। 297।।
नित्ये नैमित्तिके ध्येय: कृष्ण:प्राकृतिके लये।
आत्यन्तिके लये जाप्य: श्रीकृष्ण: शरणं मम।। 298।।
ऋषिर्नारायण: कृष्णो नरश्चैव नरोत्तम:।
कृष्णविश्वेश्वरोऽनन्त: श्रीकृष्ण: शरणं मम।। 299।।
महारथी रथी कृष्णोऽतिरथी पार्थसारथि:।
धर्मयुद्धे कुरुक्षेत्रे श्रीकृष्ण: शरणं मम।। 300।।
धर्मसंस्थापक: कृष्णो दुष्कृताञ्च विनाशक:।
साधूनां सम्परित्राता श्रीकृष्ण: शरणं मम।। 301।।
शरीरस्थोऽपि निर्लिप्त: साकार: सगुणो हरि:।
क्षेत्रज्ञ: सर्वभूतानां श्रीकृष्ण: शरणं मम।। 302।।
देहस्थ: पुरुष: कृष्ण: पति: प्राणमनोधियाम्।
चेत: प्रसादक: कृष्ण: श्रीकृष्ण: शरणं मम।। 303।।
धर्मशास्त्रवपु: कृष्ण: कृष्ण एव श्रुति: स्मृति:।
पुराणोपनिषत्कृष्ण: श्रीकृष्ण: शरणं मम।। 304।।
शास्त्रेष्वनन्यया भक्त्या भक्तपूजाऽधिका मता।।
भक्ताधीन: स्वयं कृष्ण: श्रीकृष्ण: शरणं मम।। 305।।
देवक्या: सप्तमो गर्भो रोहिणीं योगमायया।
प्रणीतो वैष्णवं धाम श्रीकृष्ण: शरणं मम।। 306।।

कृष्ण: सर्वगत: सत्त्वनिधि: कृष्णस्त्र्यधीश्वर:।
भूतप्रकृतिमोक्षेश: श्रीकृष्ण: शरणं मम।। 307।।
भक्तानां नयनानन्दभाजनो भवमोचन:।
प्रसन्नवदनाम्भोज: श्रीकृष्ण: शरणं मम।। 308।।
कृष्ण: श्रिय: पतिर्यज्ञपति: कृष्ण: प्रजापति:।।
कृष्णो धरापतिर्ध्येय: श्रीकृष्ण: शरणं मम।। 309।।
स्मरणाद् वन्दनात् कृष्ण: श्रवणात् कीर्तनात्तथा।
सद्य: पापहर: कृष्ण: श्रीकृष्ण: शरणं मम।। 310।।
कृष्ण: पूर्वञ्च पश्चाच्च कृष्णो वामे पुरस्तथा।
दक्षिणे परित: कृष्ण: श्रीकृष्ण: शरणं मम।। 311।।
अन्वयेन सदा ज्ञेयो व्यतिरेकेण वा पुन:।
तत्त्वजिज्ञासुभि: कृष्ण: श्रीकृष्ण: शरणं मम।। 312।।
राधा विद्युत्प्रभा-गौरी कृष्णो नीलाम्बुदोपम:।
नीलपीतच्छवि: कृष्ण: श्रीकृष्ण: शरणं मम।। 313।।
भुवो भारहर: कृष्णो भवाब्धे: कर्णधारक:।
भक्तचित्तहर: कृष्ण: श्रीकृष्ण: शरणं मम।। 314।।
गोपो गिरिधरो देवो देवेन्द्रमानमर्दन:।
गोकुलानन्दद: कृष्ण: श्रीकृष्ण: शरणं मम।। 315।।
व्रजे वृन्दावने रम्ये निकुञ्जे गोपवल्लभ:।
राधासर्वेश्वर: कृष्ण: श्रीकृष्ण: शरणं मम।। 316।।
प्रत्यक्षा वाङ्मयी मूर्ति: श्रीमद्भागवतं हरे:।
कृष्णस्तिरोहितश्चात्र श्रीकृष्ण: शरणं मम।। 317।।
श्रीकृष्णोपासनासिद्ध्यै श्रीमद्वल्लभवल्लभ:।
मन्त्रो ह्यप्यक्षरो जाप्य: श्रीकृष्ण: शरणं मम।। 318।।
सर्वेश: सर्वरूपश्च श्रीनिवास: सनातन:।
भक्तसेवितपादाब्ज: श्रीकृष्ण: शरणं मम।। 319।।
दीप्तिमान् कीर्तिमान् कृष्ण: कान्तिमान् शक्तिमांस्तथा।
विभूतिमान् विभु: कृष्ण: श्रीकृष्ण: शरणं मम।। 320।।

''जय जय श्रीकृष्णमन्त्र महास्तोत्रे दशमो विराम:''

।। श्रीकृष्ण: शरणं मम।।

( पूर्वप्राध्यापक: ), पो.-छापर ( चूरू )
Mob.: 9351226660

**प्रतीककथा**

# देहश्यामपटः ( बुरखा )

❑ डॉ. ऋषिराजजानी

सलीमा गृहतालकम् उद्घाट्य अन्तः प्रविष्टा। मईमासस्य मध्याह्ने असह्यातपे तस्यै आपादमस्तकं देहश्यामपटः त्रासदायकोऽलक्ष्यत। गृहे कब्रस्थानसदृशी शान्तिः प्रावर्तत। तस्याः पतिः अब्बासः कुलपरम्परागतं वस्त्रव्यापारम् अकरोत्। स आप्रातःकालाद् रात्रिपर्यन्तम् आपणे उपाविशत्। अतः समग्रेऽपि दिवसे ईदृशी शान्तिर्गृहमावृणोत्। यद्यपि सा ईदृश्याः शान्त्या अभ्यस्ता आसीत् किन्तु तस्मिन् दिने सा मनःसन्तापमन्वभवत् यादृशां बहुकालात् पूर्वं तया अनुभूत मासीत्। सिक्थवर्तिवद् विगलन् मम 'बुरखा-' वस्त्राच्छादितो देहोऽपि च वह्निज्योतिर्वत् प्रज्वलन्मनो मम स्वात्मानम् उभावपि भस्मसात् करिष्यति इति सा अचिन्तयत्। अतः सत्वरं सा बुरखावस्त्रं न्यक्षिपत्। कब्रसमाधिस्थं शवं यथा भूकीटकाः कवलीकुर्वन्ति तथैव गृहान्तर्मूकभित्तयः अपि च गृहाद् बहिः बुरखावस्त्रं मां भक्षयिष्यन्तीति सा अन्वभवत्। क्षणं यावत् सा बुरखावस्त्रं सतिरस्कारम् अपश्यत्। सा विह्वला भूत्वा व्यचारयत् गृहभित्तिं भङ्क्त्वा बहिःपलायनं कुर्याम् पृथ्वीं वा त्यक्त्वा ग्रहान्तरं गमिष्यामि यत्र शरीरश्यामाच्छादनं न भवेदिति। किन्तु एतत् सर्वं कथं शक्यम्? बुरखावस्त्रं दृष्ट्वा तस्मिन् दिने तस्याः नेत्रयोः पुरतः वारं वारं किं तदेव मुखम् आयाति स्म? तदेव मुखं, तदेव हास्यं, त एव संलापाः, स एव ध्वनिः.....। नहि नहि। सा नेत्रे पिधाय कर्णयोर्हस्तौ न्यवेषयत्। वर्षचतुष्टयात् पूर्वं सा सर्वा अपि कथाः बुरखावस्त्रे आच्छादयत्। तर्हि कस्माद् एताः सर्वाः कथा लावाद्रववत् तस्मिन् दिने बहिरागच्छन्ति स्म ?

यदा सा बाल्यावस्थायामासीत् तदा सा सदैव मातरमपश्यत्। अनिमेषं स्फटिकपाषाणसदृशीं मातुः मूर्तिम् अपि च स्रोतोञ्जन (सुरमा) युक्ते मातुर्नेत्रे सा अस्पृहयत्। किन्तु गृहाद् बहिरत्राऽऽगमनादेव माता देहश्यामपटमधारयद् अपि च श्यामवस्त्रावृतेषु नार्याकारेषु माता व्यगलत्। गृहे सा यां 'अम्मीम्' अकथयत्, सा बाह्यजगति केवलं श्मामदेहपट आसीत्- अन्यश्यामदेहपटसदृशो रूपवर्जितः तिमिरसदृशः। सलीमायै माता बुरखावस्त्रं अधारयत् तद् ईषदपि नारोचत। किन्तु माता अवदत्, 'नारीभिः कदापि देहश्यामपटो न त्याज्यः। बुरखावस्त्रं नारीणां देहस्याभिन्नाङ्गं वर्तते। वत्से ! अधुना त्वं लघुवयस्का। यदा त्वं युवती भविष्यसि तदा त्वमपि स्वयमेव वस्त्रपटस्य महत्त्वं ज्ञास्यसि। बुरखावस्त्रेण नार्यः सुरक्षिताः सन्ति।' बाल्यकाले यदा अग्रजः इमरानो द्विचक्रिकाम् अचालयत् तदा सा व्यचारयत् यद् अहमपि द्विचक्रिकया दूरम् अन्यद् देशं गमिष्यामि यत्र अहं शीतकाले मसृणं सूर्यातपं शरीरे धारयेयम्, उष्णकाले नद्यां प्लवनं कुर्याम्, नदीं तीर्त्वा तटान्तरं गच्छेयम्, वर्षासु प्रथमवृष्टेर्जलबिन्दून् उपवनेषु कुन्दसुगन्धं जिघ्रेयम् वा अनावृतगगने मुक्तविहगो भूत्वा गायेयम्। किन्तु एतत्सर्वं बुरखावस्त्रं विना- 'इति। रात्रौ दीर्घकालपर्यन्तं सा चन्द्रमसम् अपश्यत्। यथा चन्द्रिका तिमिरगुण्ठनम् उत्क्षिप्य स्वद्युतिं पर्वतेषु, नदीषु, नगरेषु, प्रसारयति तथैव सलीमापि जगति स्वात्मानं प्रसारयितुमकामयत। किन्तु एतत् सर्वं स्वप्नकल्पम् आसीत्। यदा सा शालायां

पठतिस्म तदा एकवारं सा गायनप्रतियोगितायां भागम् अगृह्णात्। सा सखीभिः सह 'पायोजी मैंने रामरतन धन पायो' इति गीतिमगायत्। यदा तस्याः पिता इमं वृत्तान्तमजानात् तदा स शिक्षिकायै अक्रुध्यत्, कठोर-वाक्यानि अब्रवीद् अपि च तस्यै चपेटामददात्। तदनन्तरं सा कदापि नोदघाटयत् स्वमुखम्।

शनैः शनैः सा वृद्धिमाप्नोद् अपि च माध्यमिक-शालामगच्छत्। समाजे स्त्रीपुरुषयोर्भेदमजानात्। 'सर्वे नियमाः नारीणां कृत एव?' इत्ययं प्रश्नः तां व्याकुलाम-करोत्। किन्तु अब्बाजानस्य(पितुः) भयवशात् सा गृहे कदापि मुखरा नाभवत्।

सहसा एकस्यां रात्रौ तस्या अग्रज ईमरान एकां युवतीं गृहमानयत्।'फाल्गुनी' इति तस्या नाम आसीत्। तस्यां रात्रौ पिता मौलवीमहाशयमानयत्। अपरेद्युर्गृह-सदस्यास्तां 'फरीदा' इत्यभिधानेन आह्वयन्। फरीदा सलीमाया नातिज्यायसी। अतः सलीमायै फरीदा विशेषतोऽरोचत। फरीदा तस्या भ्रातृजाया आसीदेव किन्तु सा सखीवद् आचरत्। सलीमा स्वमनोगतं तस्यै न्यवेदयत् तदा फरीदा ताम् अवाबोधयत् 'भगिनि ! नार्या जीवनं ईदृशमेव वर्तते। स्त्रीणां समीपे स्वकीयं किञ्चिदपि नास्त्येव' - न गृहं, न धनं, न सम्बन्धिनः, न नामापि। यः कोऽपि धर्मो भवेत्, नारी स्वार्थे न जीवितुं शक्नोति इति। फरीदा स्वसर्वमपि परित्यज्य धर्ममपि विहाय नामापि त्यक्त्वा आगता। अतः सलीमा फरीदां प्रति बहुमानं प्रादर्शयत्।

कालो व्यतीतः। महाविद्यालये तस्याः सख्यः सुन्दराणि वस्त्राणि धृत्वा आगताः, अपि च निशीथे चलचित्रं दृष्ट्वा आगच्छन्। ता दृष्ट्वा सलीमाऽपि एतत् सर्वं कर्तुमैच्छत् किन्तु तस्याः कृते एतत् अशक्यमासीत्। एकदा ग्रन्थालयात् सा पुस्तकानि गृहमानयत्। सहसा सा पुस्तकपृष्ठानां मध्ये एकं कर्गजमपश्यत्। कर्गजे लिखितमासीत् यत्-

**''पर्वतानाम् उन्नतशिखराणि स्वपादतले कन्दरां पेषयन्ति, कन्दरास्वरं रुन्धन्ति, शिखराणि कन्दरां प्रति पाषाणशकलान् क्षिपन्ति, कन्दरां परित आवृत्य बन्धनस्थां कुर्वन्ति। किन्तु एकदा कन्दरा कम्पिष्यते तदा शिखराणां ध्वंसो भविष्यति। तत्पश्चात् सर्वत्र भविष्यति-नोन्नता- न निम्ना-समतला पृथ्वी। सर्वत्र समत्वं भविष्यति।''**

**-शान्तनु :**

शान्तनुः सलीमायाः सहपाठी आसीत्। अपरेद्युः सा शान्तनुम् अमिलद् अपि च तस्य काव्यस्य प्रशंसामकरोत्। तत्पश्चात् तौ वारं वारं वार्तालापम-कुरुताम्। तयोर्मेलनमपि पुनः पुनर् जायते स्म। शान्तनुर्नास्तिको बुद्धिवादी आसीत्। स मध्यमवर्गीय आसीत् अपि च स मुक्तजीवनशैलीमन्वकरोत्। स सदैव 'लेनिन' 'मार्क्स' 'सिगमन्ड फ्रोईड' इत्यादीनां विचाराणां समर्थन-मकरोत्। तस्य वचनेषु सा क्रान्तिज्वालामन्वभवत्। सा तेन सह दीर्घकालपर्यन्तम् आलपत्। शान्तनुस्तां स्वकाव्यानि अश्रावयत्। सा रहसि तस्य काव्यपङ्क्तीः शनैरजल्पत्। शनैः शनैः सलीमाशान्तनू निकटे आगतौ। शान्तनोर्नाम सलीमायाः कृते आयातवाक्यमिव अभवत्। शान्तनुं विना तस्याः कृते जीवनमशक्यमभवत्। गृहजनान् तद् विषयकं वक्तुं सा नाशक्नोत् अतः सा फरीदां सर्वकथामवदत्। फरीदा उक्तवती, 'किं वदसि, सलीमे ? हिन्दुयुवकेन सार्धं प्रणयविवाहः ? प्रमत्ता जाता किम् ? यदि इमरानो ज्ञास्यति तर्हि स त्वां हनिष्यति।' इति। फरीदा सलीमां भृशं प्रत्यबोधयत् किन्तु सलीमा स्वनिर्णये निश्चलाऽ-सीत्। सलीमा फरीदायै असूयामन्वभवद् यतो फरीदा

यस्मिन् अस्निह्यत् तेन सहैव जीवनयापनं कर्तुं समर्था। सलीमाया हठाग्रहवशात् फरीदा सभयं सर्ववृत्तान्तं इमरानाय न्यवेदयत्। इमरानः सक्रोधमवदत्, 'यदि स युवकः इस्लामधर्ममङ्गीकुर्यात् तदा विवाहः शक्यः। अन्यथा तं विस्मर। यदि पुनरपि युवां मम दृष्टिमार्गमागमिष्यथः तर्हि समीचीनं न भविष्यतीति।' शान्तनुर्निरीश्वरवादी आसीत् अतः स सलीमां पलायनं कृत्वा विवाहं रचयितुमवदत्। सलीमापि तस्य निवेदनं स्व्यकरोत्।

तस्मिन् दिवसे तौ उद्याने मेलनं निश्चितमकुरुताम्। सलीमा गृहाद् फरीदायाः बुरखावस्त्रं धृत्वा तूष्णीकं पलायनमकरोत्। सर्वं यथानिश्चितं प्रवर्तते स्म किन्तु उद्यानसमीपे एकं कारयानमागच्छत्। श्यामवस्त्रैर्मुखा-न्याच्छाद्य पञ्चषा दण्डपाणयो जनाः कारयानात् अवातरन्। ते शान्तनुं भृशमताडयन्। शान्तनुः प्रतिकारमकरोत् किन्तु एका यष्टिः तस्य शिरसि पतिता। स भुवि न्यपतत्। सलीमायाः श्यामदेहपटः तस्य रुधिरेण लाञ्छितः। ते जनाः तां बलात् कारयानेन अनयन्। इमरानः तस्या विवाहम् अब्बासेन सह अकारयत्।

अब्बासस्य प्रथमपत्नी वन्ध्याऽसीत्। अतः स सलीमां द्वितीयपत्नीमकरोत्। ततः पश्चात् बालकाः, कुटुम्बभारः, पतिसेवा-एतत् सर्वं तस्याः शिरसि आगच्छत्।

सहसैव समीपस्थात् मस्जिदात् निमाजस्वरः अश्रूयत। सलीमा विचारजालाद् बहिरागता। सा चिरकालमत्यवाहयत्। आसन्दीस्थं तस्याः बुरखावस्त्रं तां प्रति उपाहसत्। अस्या वस्त्रात् सा शान्तनोः रक्तगन्धमजिघ्रत्। तस्याः कण्ठो रुद्धः। सा उच्चैः रोदितुमैच्छत् किन्तु कण्ठाद् रोदनशब्दो न निरगच्छत्। सा सहसैव द्वारघण्टामशृणोत्। बहिः अब्बासः स्थितः। स अवदत्, 'सलीमे ! त्वरां कुरु। रफीकपितृव्यस्य स्वास्थ्यं न समीचीनम् बुरखावस्त्रं धारय। बहिः रिक्शायानं प्रतीक्षते।' इति।

सलीमा पुनरपि बुरखावस्त्रम् अधारयत्। सा किशोरावस्थायां पितुरादेशात्, यौवने इमरानस्य आज्ञया अपि च अधुना अब्बासस्य निदेशाद् बुरखावस्त्रं निरन्तरं धारयति स्म,धारयति च। पुनरपि सा तिरोहितमकरोत् स्वास्तित्वं बुरखावस्त्रे। श्यामाच्छादने आच्छादिता जाताः तस्या मनोरथाः, सङ्कल्पाः, एषणाः, निर्भयता, प्रेम, प्रसन्नता, जिजीविषाः - एते सर्वेऽपि भावा निगूढाः पुनरपि सर्वथा।

**8, राजतिलक बंगलोज, आबादनगर बसस्टोप के पास, बोपल, अहमदाबाद-380058**

# संस्कृतसमाचाराः

संस्कृतजगति समुत्साहप्रदोऽयं समाचारो यद् वर्तमानायां पञ्चदशतमायां राजस्थानविधानसभायां नवनिर्वाचितैर्दशभिर्विधायकैः संस्कृतभाषायां शपथं गृहीत्वा संस्कृतं तथा च संस्कृतिं प्रति स्वात्मनो हार्दिकोऽनुरागः प्रदर्शितः। ते सन्ति श्रीमन्तो वासुदेव देवनानी, अशोक लाहोटी, छगन सिंह राजपुरोहितः, जोगेश्वर गर्गः, विट्ठलशंकर अवस्थी, धर्मनारायण जोशी, पब्बाराम विश्नोई, मदनदिलावरः, डॉ. राजकुमार जोशी, सन्दीपशर्माणश्च। संस्कृतभारतीपत्रिका-परिवार-पक्षत-स्तेषां हार्दिकमभिनन्दनम् कोटिशः साधुवादाश्च तेभ्यः प्रदीयन्ते।

लघुकथा

# मन्त्राणां शक्तिः

❑ डॉ. हर्षदेवमाधवः

काशी भारतस्य प्राचीननगरी अस्ति। काशी पुराणेषु प्रसिद्धा नगरी अस्ति। भगवतः विश्वनाथस्य मन्दिरं वर्तते। तत्र काशी विद्यायाः नगरी अस्ति। प्राचीनकाले अपि तत्र अनेके पण्डिता आसन्। दिवोदासः काशीदेशस्य राजा आसीत्। तदा तस्यां नगर्यां शिवशर्मा नाम एकः पण्डित आसीत्। शिवशर्मा महान् विद्वान् आसीत्। सः चतुरो वेदान् अजानात्। स अनेकेषु शास्त्रेषु निपुण आसीत्। सः प्रतिदिनं स्वगृहे यज्ञं करोति। सः सहसा एकं हस्तलिखितं ग्रन्थं प्राप्नोत्। असौ ग्रन्थः तेन कथं लब्धं तद् वृत्तान्तं सः कमपि न अकथयत्।

सः हस्तलिखितं ग्रन्थम् अपठत्। तत्र सर्वविद्यानां रहस्यानि आसन्। शिवपण्डितः सर्वमन्त्राणां रहस्यानि अपि अजानात्। तस्मिन् ग्रन्थे विद्यानां गुप्तरहस्यानि अपि प्राप्नोत्। असौ ग्रन्थः केन लिखितः, कदा लिखितः – इति ग्रन्थे न लिखितम् आसीत्।

शिवपण्डितः यथा यथा ग्रन्थम् अपठत् तथा तथा तस्य मुखे अपि दिव्यं तेजः व्याप्तम् अभवत्। तेन तेजसा शिवपण्डितः समग्रे काशीनगरे प्रभावकः अभवत्। सर्वे पण्डिता तम् अनमन्। राजा दिवोदासः अपि तम् अनमत्।

एकदा शिवपण्डितः बालकान् पाठयति स्म। सर्वे वृक्षतले स्थण्डिले उपविष्टाः आसन्। वृक्षः पुरातनः जीर्ण आसीत्। तस्य शाखासु पर्णानि अपि न आसन्। सर्वे ग्रीष्मतापात् पीडिताः अभवन्। शिवपण्डितः अपि तीव्रसूर्यातपात् विह्वलः अभवत्। सः शिष्यान् अवदत् 'मम प्रियशिष्याः ! सूर्यातपः असह्याः वर्तते। वयं किं कुर्मः?' सर्वे अवदन् 'गुरुवर्य ! अन्यत्र गच्छामः।' शिवपण्डितः अवदत्, 'न हि। अयं वृक्षः पर्णैः हरितः भवेत् चेत्...' एक शिष्यः अवदत्, 'किन्तु गुरुवर्य ! अयं वृक्षोऽधुना जीर्णोः जातः। अस्मिन् वर्षे वसन्तर्तावपि पर्णानि न भवन्ति।' शिवपण्डित अहसत्। 'अयं वृक्षः एव शीघ्रं पल्लवितः भविष्यति।' सर्वे अवदन्, 'कथं कथं भविष्यति ? इदं न शक्यम्।' शिवपण्डितः अवदत् 'बालकाः ! मन्त्रैः सर्वम् एव शक्यम्। पश्यत, अहं वृक्षं हरितं करोमि।' सर्वे उत्सुकाः अभवन्। शिवपण्डितः कमण्डलोः जलम् अगृह्णात्। हस्तपुटे जलं गृहीत्वा सः सञ्जीवनीमन्त्रम् मनसि अस्मरत्। सः तज्जलं वृक्षोपरि अक्षिपत्। क्षणम् एव वृक्षः पुनः हरितः अभवत्। सर्वशाखासु पर्णानि अजायन्त। वृक्षस्य छाया शीतला अभवत्। सर्वे शिष्याः 'गुरुदेवः जयतु, गुरुदेवः जयतु' इति अवदन्। सर्वे शिवपण्डितस्य मन्त्रस्य प्रभावम् अपश्यन्।

काशीनगरे एताः वार्ताः प्रासरन्। सर्वे नगरजनाः तं वृक्षम् अपश्यन्। सर्वे शिवपण्डितस्य जयनादम् अकुर्वन्। काशीदेशस्य राजा दिवोदासः अपि इमं चमत्कारम् अपश्यत्।

एकदा शिवपण्डितः शिष्यैः सह ग्रामान्तरं गच्छति स्म। मार्गे अरण्यम् आगतम्। तत्र एकस्मिन् तरुतले शिवपण्डितः एकम् अस्थिपञ्जरम् अपश्यत्। सर्वे शिष्याः अपि महाकायस्य प्राणिनः अस्थिपञ्जरम् अपश्यन्। सर्वे शिष्याः सकुतूहलम् अपश्यन्। एकः अवदत्, 'नूनम् अयम् अस्थिपञ्जरः सिंहस्य वर्तते।' द्वितीयोऽवदत्, 'नहि नहि वृकस्य अस्थिपञ्जरोऽस्ति।' तृतीयोऽवदत् 'अस्थिपञ्जरस्य आकारम् अहं पश्यामि। अयं द्वीपिनः अस्थिपञ्जरोऽस्ति।' शिवपण्डितः अवदत्, 'हे मम प्रियशिष्या ! यूयं सर्वे वृक्षम् आरुह्य पश्यत।' अहं कस्य अस्थिपञ्जरोऽयम् इति दर्शयामि।

सर्वे बालकाः वृक्षम् आरूढाः। सर्वे कुतूहलेन पश्यन्ति स्म। शिवपण्डितः एकादशवारं मृतसञ्जीवनी-मन्त्रम् अवदत्। ततः पश्चात् सः कमण्डलोः जलम् अस्थिपञ्जरे न्यक्षिपत्। अस्थिपञ्जरात् चैतन्यं प्राप्य व्याघ्रः सजीवः अभवत्। शिवपण्डितः व्याघ्रस्य नेत्रयोः स्वनेत्राभ्याम् अनिमेषम् अपश्यत्। सः संमोहनमन्त्रम् अवदत्। सः अवदत्, 'पुत्रक व्याघ्र ! मया त्वं पुनर्जीवितः कृतः। त्वं मम पुत्रोऽसि। अहं तव प्राणदाता पिता। त्वम् अधुना कमपि मनुष्यं न हनिष्यसि। त्वं मम सेवको भव।' एतत् श्रुत्वा व्याघ्रः शिवपण्डितस्य पादयोः अपतत्। सः शिरः नमयित्वा अतिष्ठत्। शिवपण्डितः अवदत्, 'अहम् अधुना श्रान्तः। मां मम नगरं नय।' इत्युक्त्वा शिवपण्डितः व्याघ्रस्य पृष्ठे उपाविशत्। व्याघ्रः शिष्यैः सह तं काशीनगरम् अनयत्। शिष्याः व्याघ्रं परितः चलन्ति स्म। काशीनगरस्य जनाः एतत् आश्चर्यम् अपश्यन्। सर्वे भयान्विताः अपि अभवन्। राजा दिवोदासः स्वरथेन सभां गच्छति स्म। व्याघ्रस्य वाहने शिवपण्डितं सोऽपश्यत्। राजा सबहुमानं रथात् अवातरत्। सः शिवपण्डितस्य पूजाम् अकरोत्। राजा दिवोदासः शिवपण्डितम् अकथयत्, 'त्वं मम सभायां पण्डितोः भव अहं त्वां मम गुरुं मन्ये। त्वम् इमं व्याघ्रं मह्यं देहि। अहम् इम् व्याघ्रं मम प्रियसेवकं करिष्यामि।' शिवपण्डितोऽवदत् 'सर्वे प्राणिनः अहिंसकाः सन्ति। ते न कस्य अपि सेवकाः। अहं व्याघ्रं मम सेवकं न मन्ये, किन्तु अयं मे बन्धुः। वस्तुतः प्राणिनः मनुष्यात् भयम् अनुभवन्ति। अत एव ते हिंसकाः भवन्ति। अहं प्राणिनां मैत्रीं दर्शयितुम् अत्र व्याघ्रम् आनयम्। सर्वे जनाः प्राणिभिः सह मैत्रीपूर्णं व्यवहारं कुर्वन्तु।' इति मे प्रार्थना। शिवपण्डितः व्याघ्रात् अवातरत्। सः व्याघ्रम् अवदत्, 'भ्रातः ! अस्मिन् नगरे तव गृहं नास्ति। त्वं वनं गच्छ।' व्याघ्रः शिवपण्डितस्य पादयोः पतित्वा वनं प्रति अगच्छत्।' सर्वे शिवपण्डितस्य वचनं श्रुत्वा प्रसन्नाः अभवन्। राजा शिवपण्डिताय धनम् अददात्। किन्तु शिवपण्डितः सर्वं धनं भिक्षुकेभ्यः अददात्।

एकदा शिवपण्डितः शिवपूजां कर्तुं गच्छति स्म। राजा गजम् आरुह्य राजमार्गे गच्छति स्म। सहसा रक्तवस्त्रं साधुं दृष्ट्वा गजः प्रमत्तोऽभवत्। गजः मस्तकम् इत ततः अभ्रामयत्। हस्तिपकः अङ्कुशेन गजं वशं कर्तुं प्रायतत् किन्तु गजः अधिकः कोपान्वितः अभवत्। गजः शुण्ड्या मार्गस्य जनान् उत्क्षिप्य अक्षिपत् राज्ञः आसनम् अपि पृष्ठात् अचलत्। राज्ञः पतनस्य भयम् अजायत। यदा शिवपण्डितः तत्र अधावत्। सः गजस्य नेत्रयोः अपश्यत्। वशीकरणमन्त्रम् उक्त्वा सः कमण्डलोः जलं तस्मिन् अक्षिपत्। गजः तत्क्षणम् एव स्थिरोऽभवत्। इत्थं शिवपण्डितो राज्ञः प्राणानां रक्षाम् अकरोत्। राजा शिवपण्डितस्य बहुमानं कृत्वा तं राजसभाम् अनयत्। तस्य आग्रहवशात् शिवपण्डितः राज्ञः कुलगुरुः अभवत्। किन्तु शिवपण्डितः प्रतिदिनं सायंकाले शिष्यान् पाठयति स्म। सः राज्यस्य कल्याणाय यज्ञान् अकरोत्। सर्वे प्राणिनः मैत्रीपूर्णाः अभवन्। सर्वेषां वैराणि नष्टानि। राज्यस्य समृद्धिः अवर्धत। एतत् सर्वं ज्ञात्वा प्रतिवेशी शूरसेनदेशस्य सूर्यसेननामा शत्रुराजा ईर्ष्यालुः अभवत्। सः सेनया सह आक्रमणम् अकरोत्। तस्य समीपे विशालं सैन्यम् आसीत्। काशीदेशस्य सैन्यं लघुकम् आसीत्। अतः दिवोदासः पराजयस्य भयम् अन्वभवत्। सः मन्त्रिमण्डलस्य सभायाम् अवदत् 'वय सूर्यसेनं जेतुं न शक्तिमन्तः। वयम् अस्माकं पराजयं युद्धात् पूर्वम् एव स्वीकुर्मः।' तदा शिवपण्डितः अवदत् 'महाराज ! क्षमां कुरु। त्वं भयम् मा अनुभव।' अहं मन्त्रबलेन सूर्यसेनं वशीभूतं करिष्यामि। कामं सः आक्रमणं करोतु। त्वम्

अपि स्वसैन्यं सज्जं कुरु। सूर्यसेनस्य सैन्यं सीघ्रः समीपे आगच्छत्। दिवोदासः अपि स्वसैन्येन सह पुरतः स्थितः। सूर्यसैन्यस्य विशालं सैन्यं दृष्ट्वा दिवोदासः भयभीतः अभवत्। सूर्यसेनस्य सेनापतिः आक्रमणं कर्तुम् आदिशत्। तदा द्वयोः सेनयोर्मध्ये शिवपण्डितः अतिष्ठत्। सः उच्चैः शत्रुस्तम्भनमन्त्रान् अब्रवीत्। तच्छ्रुत्वा शत्रुसैन्यं चित्रे आलिखितम् इव अतिष्ठत्। सैनिकाः प्रहारं कर्तुं न क्षमाः। अश्वाः रथाः गजाः अपि च पदातयः सर्वे स्वस्थानेषु स्थिताः। शूरसेनदेशस्य राजा सूर्यसेनः अपि स्तब्धः अभवत्। तदा शिवपण्डितः सूर्यसेनस्य समीपे गत्वा सम्मोहनमन्त्रस्य प्रयोगम् अकरोत्। सूर्यसेनः सम्मोहितः अभवत्। तदा शिवपण्डितः तं दिवोदासं पुरतः आनयत्। दिवोदासः खड्गेन सूर्यसेनस्य वधं कर्तुं अग्रे आगच्छत्। किन्तु शिवपण्डितः तं न्यवारयत्। सः उच्चैरवदत्, 'महाराज! मम मन्त्राणां प्रयोगः स्वात्मरक्षायै अस्ति।' अहिंसार्थम् अहं मन्त्रदेवताम् आह्वयामि। परेषां हितार्थं वा स्व-स्वार्थस्य कृते अन्येषां वधं कर्तुं मम मन्त्राः न सन्ति। सूर्यसेनः तव मित्रं भविष्यति। ततः शिवपण्डितः वैदिकमन्त्रान् अवदत्। सः सूर्यसेनं मित्रतां कर्तुं प्रार्थयत्। सः युद्धस्य हिंसां निवारयितुं न्यवेदयत्। सूर्यसेनः शिवपण्डितस्य वचनानि श्रुत्वा प्रसन्नः अभवत्। सः दिवोदासेन सह सन्धिम् अकरोत्। अतः दिवोदासस्य शक्तिः अपि अवर्धत। राजा दिवोदासः शिवपण्डितम् अपूजयत्। एकदा समग्रेऽपि राष्ट्रे दुर्भिक्षकालः आगतः। वृक्षाः सर्वे शुष्काः नदीषु जलस्य अभाव आसीत्। प्राणिनः तृणैः विना अम्रियन्त। तदा शिवपण्डितः पर्जन्ययज्ञं कृतवान्। यद्यपि वर्षाकालः समाप्तिं गतः तथापि हेमन्तकाले अपि प्रभूता वृष्टिः अभवत्। ततः पश्चात् एकदा अतिवृष्टिः जाता। गङ्गानदी पूरप्लाविता अभवत्। सर्वत्र जलप्रलयः अदृश्यत। गङ्गाजलं उन्मत्तं भूत्वा सर्वत्र विनाशम् अकरोत्। शिवपण्डितः तदा शिष्यैः सह मणिकर्णिका घट्टे अतिष्ठत्। सः गङ्गायाः पूजनं कृत्वा प्रार्थयत्। गङ्गायाः जलात् एका दिव्यस्त्री बहिः आगच्छत्। सा शिवपण्डितस्य पूजां कृतवती। तत्क्षणम् एव गङ्गायाः जलताण्डवम् अशाम्यत्।

शिवपण्डितस्य मन्त्राणां प्रभावं दृष्ट्वा जनाः तं साक्षात् देवम् इव अपूजयन्, किन्तु दिवोदासस्य मन्त्रिणः असूयाम् अनुभवन्ति स्म। एकदा राजा मन्त्रिभिः सह मन्त्रणां करोति स्म। तदा राजा अकथयत्, 'शिवपण्डितस्य कृपया अस्माकं राज्ये सर्वत्र सुखं वर्तते। सः प्रजायाः कल्याणं करोति। तस्य मन्त्राणां प्रभावात् देवाः अपि प्रसन्नाः। अस्माकं देशः धनधान्यपूर्णः अस्ति।' तदा एकः मन्त्री अवदत्, 'किन्तु महाराज! सर्वे जनाः त्वत्तः अपि अधिकं शिवपण्डितस्य बहुमानं कुर्वन्ति। जनाः त्वां शिवपण्डितस्य दासं मन्यन्ते।'

द्वितीयः मन्त्री अवदत्, 'महाराज! यदि शिवपण्डितः शत्रुराज्ये निवसेत् तदा सः अस्माकं पराजयं कुर्यात्।' तृतीयः अवदत्, 'महाराज! धनलोभवशात् शिवपण्डितः राज्यान्तरं गमिष्यति।' इति मे मतिः। चतुर्थः अवदत्, 'महाराज! शिवपण्डिताय ग्रामाणां शतं दत्त्वा प्रसन्नं कुरु। अपि च अस्माकं गुप्तचरैः तस्य वृत्तं सततं जानीहि।' पञ्चमः अवदत् 'ब्राह्मणाः धनलोलुपाः भवन्ति। यदि त्वं ग्रामाणां शतं दास्यसि तदा तस्य कामना वर्धिष्यते। अतः शिवपण्डितं कठोरे कारागारे निक्षिप।' रात्रौ सर्वेषां वचनानि श्रुत्वा राजा विचारयति स्म। तदा सहसा एव तत्र शिवपण्डितः आगतः। तं दृष्ट्वा सर्वे आश्चर्यचकिताः अभवन्। शिवपण्डितः अवदत् 'महाराज! अहं तव ग्रामाणां शतं वा सहस्रं वा न कामये। ब्राह्मणाः धनलोलुपाः न सन्ति। ते राज्यं तृणम् इव मन्यन्ते। मम मतिः मन्त्रिणां सदृशी छलकपटमयी नास्ति। अद्यपर्यन्तम्

अहं मन्त्राणां प्रयोगं कदापि स्वार्थाय न अकरवम्। विद्या एव मम धनं वर्तते। तथापि अहं सर्वमन्त्रान् अधुना एव प्रत्यर्पयामि। अहं तु शुद्धविद्यायाः उपासकः। यूयं सर्वे पश्यत।' इत्युक्त्वा शिवपण्डितः वेदिकायाम् अग्निं प्राज्वालयत्। सः उच्चैः अग्निदेवस्य मन्त्रान् अवदत्। सः भावुकः भूत्वा गद्‌गद्‌कण्ठेन मन्त्रान् अगायत्। तदा वेदिकायाः अग्निदेवः स्वयं दर्शनम् अददात्। अस्य देहः सुवर्णमयः आसीत्। तस्य रूपं अग्निज्वालाभिः दुर्दर्शनीयम् आसीत्। तस्य देहकान्तिः तप्तस्वर्णमयी आसीत्। शिवपण्डितः स्वस्यूतात् हस्तलिखितं ग्रन्थं निष्कास्य तं अग्निदेवस्य हस्ते अददात्। अग्निदेवः तिरोहितः अभवत्। सर्वे 'महान् अनर्थः जातः। दिव्यविद्या नष्टा। इति अवदन्। दिवोदासः दुःखितः अभवत्। सः शिवपण्डितस्य पादयोः पतित्वा क्षमाम् अयाचत। सः अवदत्, 'मम मौर्ख्यात् सर्वे मन्त्राः भस्मीभूताः जाताः।' शिवपण्डितः अहसत्। सः अकथयत्, 'महाराज! एकदा अहं मम गृहे यज्ञशालायां यज्ञम् अकरवम्। तदा अग्निदेवः स्वयम् आगत्य इमं ग्रन्थं माह्यमददात्। अधुना मया ज्ञातं यत् परेषां कल्याणार्थं कृतः मन्त्राणां प्रयोगः अपि असूयां जनयति। अतः अधुना अहम् आत्मकल्याणार्थं मन्त्रान् ज्ञास्यामि। यः परेषां कल्याणं करोति तस्य कल्याणम् एव भवति। अधुना अहं केवलं शिष्यान् पाठयिष्यामि। अहं राज्यसभायां न आगमिष्यामि।' सर्वे मन्त्रिणः शिवपण्डितस्य चरणयोः अपतन्। किन्तु शिवपण्डितः 'सर्वेषां कल्याणम् अस्तु।' इत्युक्त्वा अगच्छत्। शिवपण्डितः आश्रमे शिष्यान् पाठयति स्म। कदाचित् राजा दर्शनार्थम् आगच्छति स्म। शिवपण्डितस्य विद्यायाः प्रभावात् सर्वे उपद्रवाः शन्ताः। शिवपण्डितः स्वात्मनः कल्याणम् अकरोत्।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

---

# वसन्तपञ्चमी शुभ्रा

❑ **डॉ. धर्मचन्द जैन, पूर्व आचार्यः**

**वसन्तञ्चमी शुभ्रा, समायाता सुखप्रदा।**
**पूजयामः तमोहर्त्रीं, वाग्देवीं सरस्वतीम्।।**

**नवान्नप्राशनञ्चास्यां, गीत-संगीतयोर्ध्वनिः।**
**सोत्साहं क्रियते नाट्यं, स्वाद्यते प्रीतिभोजनम्।।**

**प्रकृतिः मधुरा सर्वा, पुष्पिताः तरवः लताः।**
**प्रसन्नाः प्रणयासक्ताः, वसन्तस्यैव नामतः।।**

**हेमन्तस्य गतं शैत्यं, उष्णताऽपि न बाधते।**
**सुखप्रदाः निशा जाता, दिवाकालो मनोहरः।।**

**कर्षकाः मुदिताः सर्वे, क्षेत्रेषु वीक्ष्य वैभवम्।**
**हर्षिताः मानवाः कीटाः, भ्रमराः पशुपक्षिणः।।**

**आशायाः नवतायाश्च, सन्देशः प्राप्यतेऽतुलः।**
**प्रसुप्ताः निष्क्रियाः जीवाः, सञ्चरन्ति यतस्ततः।।**

**परीक्षां सम्मुखां वीक्ष्य, छात्राः केचन चिन्तिताः।**
**स्वाध्याये दत्तचित्ताश्चेत्, साफल्यं लभ्यते ध्रुवम्।।**

**स्वागतं ऋतुराजस्य, कोकिलेनाऽपि साध्यते।**
**आयोजनं विवाहानां, प्रजाभिः संविधीयते।।**

**जयतु पञ्चमी शुक्ला, माघमासस्य शोभना।**
**सच्छास्त्र सद्विचाराणां, वर्धापिका सदा भवेत्।।**

**सेवानिवृत्त आचार्यः**
**जय नारायण व्यास यूनिवर्सिटी**
**3 K 14/25, कुडी भगतासनी, जोधपुर**

ग्रन्थगवाक्षः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# तिथिवृद्धि-तिथिक्षयादि-विवेचनम्

भारतीयपञ्चाङ्गेषु तिथिवृद्धि-तिथिक्षयाः सुविदिता एव। कस्मिंश्चन मासे नवमीद्वयं, कदाचन द्वाद्वश्याः क्षयः सूच्यते। बहुधा जन्माष्टमी-प्रभृतय उत्सवाः स्मार्तानां कृते कस्यांचन तिथौ विधेयाः सूच्यन्ते, वैष्णवानां कृतेऽन्यस्यां कस्यांचन तिथौ। एतस्य वैज्ञानिकं शास्त्रीयं कारणमस्ति यस्य शास्त्रीयो विमर्शो गतशताब्दीषु ज्योतिर्विद्भिरपि व्यधीयत, धर्मशास्त्रि-भिरपि। नवीने युगे तादृशा विमर्शा अल्पीयांस एव दृश्यन्ते। ज्योतिर्विद्भिः प्रकाशितेषु पञ्चाङ्गेष्वेव तादृश्यः सूचना उपलभ्यन्ते, यदा कदा प्रमुखोत्सवसम्बद्धास्तिथिवृद्धितिथिक्षयाः, पूर्वविद्धायां तिथौ संमान्येतायमुत्सवः परविद्धायां वेत्यादयो निर्णया वा सम्मुखमागच्छन्ति किन्तु मध्यकाले, गतशताब्द्यां च तादृशा विमर्शा अपि प्रायशः क्रियन्ते स्म, विद्वद्वृन्देषु तद्विषयाः शास्त्रार्था अपि भवन्ति स्मेति विस्मयावहं तथ्यं स्मृतिपथमायाति यदा तादृशानां शास्त्रार्थानां कश्चनाभिलेखः कुत्रचन समुपलभ्यते।

सुप्रथितानां ज्योतिर्विदां पञ्चाङ्ग प्रणेतॄणां विदुषां च हरियाणा राज्यस्थितः परिवारः परिज्ञात एव सुधियां येन बहोः कालात् श्रीमार्तण्डपञ्चाङ्गमपि प्रतिवर्षं प्रकाश्यते, व्रतपर्वोत्सवविवेचका बहुमूल्या ग्रन्था अपि प्रकाश्यन्ते। पं. श्रीमुकुन्दवल्लभज्योतिर्विदां मनीषिण उत्तराधिकारिणः पं. प्रियव्रतादयः सारस्वतमनुष्ठानमिदं परिचालयन्ति अभिजित् प्रकाशन द्वारा पंचकूलायाम् (हरियाणा)।

विद्वद्वर्यद्वयेन (पं. प्रियव्रत-शक्तिधर सहोदर-द्वयेन) प्रायः पञ्चपञ्चाशद्वर्षपूर्वं तिथिवृद्धि-तिथिक्षयादीनां ज्योतिष-धर्मशास्त्रसम्बद्धानां, विषयाणां विमर्शमादाय सञ्जातानां शास्त्रार्थानां समभिलेखनाय प्रौढः शास्त्रीयो ग्रन्थ एकः प्रणीतोऽभूद् यत्र तादृशानां शास्त्रीयाणां पक्षाणां सुदृशं परीक्षणं प्राप्यते। तिथिवृद्धितिथिक्षयादिनिर्णयो दृग्गणिता-धारितः शास्त्रानुमतो मन्यते, कथं तस्य विवेचनं विधीयते, सन् 1964 वर्षे सञ्जाते शास्त्रार्थे तादृशं विवेचनमजायत यत्र ''बाणवृद्धि-रसक्षया'' दीनां शास्त्रीयवचनानां मीमांसाऽक्रियत, पुरीशङ्कराचार्यादि-भिर्दृक्पक्षविरोधे प्रस्तुतानां वचनानामनौचित्यं प्रत्यपाद्यत। शास्त्रार्थस्यास्याभिलेखः ''शास्त्रीय पञ्चाङ्गमीमांसा'' शीर्षके ग्रन्थे सप्रमाणं प्रस्तुतोऽस्ति प्रौढे संस्कृतगद्ये। ''व्रतपर्वों की तिथियों में वैमत्य'' शीर्षके णोत्तरार्धे हिन्द्यामपि शास्त्रीयः पक्षः स्पष्टीकृतोऽस्ति।

एवंविधा ग्रन्थाः प्रमाणयन्ति यत् कथं विंश्यां शताब्द्यामपि ज्योतिष-धर्म-शास्त्रविषयकाणां शास्त्रार्थसूचकानां ग्रन्थानां प्रणयनं प्रकाशनं च क्रियते स्म। व्यतियाति काले एकविंश्यां शताब्द्यां तादृशाः शास्त्रार्थास्तादृशा ग्रन्थाश्च केवलमितिहासगवाक्षेषु स्थिता विलोक्येरन्नित्याशङ्का स्वाभाविकी।

**शास्त्रीय पञ्चाङ्ग मीमांसा-लेखकौ प्रियव्रत शक्तिधरौ। अभिजित् प्रकाशन, कोठी नं. 59, सेक्टर 6, पंचकूला ( हरियाणा ) 134109.**

## वैदिकविदुषीणां परिचायका ग्रन्थाः

भारतेऽस्माकं प्रचीनकाले महिलानां प्रभूत आदरः क्रियते स्म। विदुष्यो महिलाः समाजे सुतरामर्हणीया भवन्ति स्म। वेदकाले तु मन्त्रद्रष्टृरूपेणाऽपि तासां सम्मानोऽभूत्। अपाला आत्रेयी, घोषा काक्षीवती-त्यादयः सुविदिता ऋषिकाः। अन्येषु देशेषु धर्मेषु वा पुरुषप्रधानेन समाजेन तासां गौणत्वं समादिष्टमित्येत-स्यैवायं प्रभावोऽभूद् यद् भारतेऽपि मध्यकाले तासां गौणनागरिकत्वस्यावधारणा प्रावर्तिष्ट। वेदपाठे न तासामधिकार इति धारणा सुप्रथिताऽभूत्। आर्य-समाजादिभिरेतस्या रूढेर्विरोधोऽकारि। देशे साम्प्रतं विदुष्यो महिला विराजन्ते, वेदप्रवीणा महिलाः पौरोहित्यमप्याचरन्ति।

एतस्मिन् परिप्रेक्ष्ये तदिदमप्युल्लेखनीयं यद् गतेषु दशकेषु विविधैर्विद्वद्भिः शोधार्थिभिश्च वेदविदुषीणां विषये सुबहु वाङ्मयं सृष्टमस्ति। वेदकालीनानामृषि-काणां विवरणं प्रदाय तासां योजनाबद्धेतिहासलेखनं बहुभिर्मनीषिभिर्विहितमस्तीति विदन्त्येव सुधियः। अहमदाबादस्थेन विदुषा डॉ. भ्रमरलालजोशि-महाभागेन सोदाहरणं सप्रमाणं च वेदविदुषीणा-मृषिकाणां विशालः परिचयग्रन्थः प्रणीतोऽभूत्, भाषणानि च विहितानि तद्विषये। राजस्थानीया विद्वद्वर्या भ्रमरलालजोशि-महाभागा अहमदाबादे निवासं स्वीचक्रुः। राजस्थानीयैर्बहुभिर्विद्वद्भिर्वेदविदुषीणां परिचयाय ग्रन्थलेखनमकारि।

**कोटानगरस्थेन विदुषा पं. शिवनारायण उपाध्यायेनाऽपि ''वैदिक ऋषिकाएँ'' शीर्षको ग्रन्थो व्यलेखि हिन्दीभाषायाम्। एतस्य प्रकाशन-मपि पूर्णिमा सत्सङ्गसम्मित्या कोटास्थितया कृतमस्ति। ग्रन्थेऽस्मिन् 33 ऋषिकाणां विवरणं प्रस्तुतमस्ति, कतिपये मन्त्रा अप्युद्धृताः।**

गुर्जर-महाराष्ट्रप्रभृतिभ्योऽन्येभ्योऽप्यञ्चलेभ्यो विद्वद्भिर्लिखितास्तादृशा ग्रन्थाः प्रकाशमाप्ता येषु वैदिक विदुषीणामितिहासो विवृतोऽस्ति। गुजरातप्रान्तस्य सुप्रथिताया विदुष्या हंसाबेन हिन्डोचाया अभिनन्दनाय यो ''हंसाबेन हिन्डोचा अभिवादन ग्रन्थो'' गुर्जरप्रदेशात् प्राकाश्यत, तस्मिन् प्राचीनभारतस्य विदुषीणां, मध्यकालिकविदुषीणामाधुनिककालीनानां च विदुषीणां विशाले फलके सुविस्तृतः परिचयो मुद्रितोऽस्ति।

वैदिकवाङ्मयस्य विवेचनाय ये साहित्येतिहास-ग्रन्थाः प्रकाशिताः सन्ति तेषु सर्वेषु ''ऋषिकाणां'' सूचना सप्रमाणं प्रत्तोपलभ्यते। साम्प्रतमेव जयपुरस्थया प्राकृतभारती अकादम्या ग्रन्थ एकः प्रकाशितोऽस्ति यः ऋग्वेदे नारीणां प्रास्थितेर्विषये शोधग्रन्थरूपेण तस्मिन् काले देशे महिलानां समादरणीयं स्थानं विवृणोति। जोधपुरस्थया डॉ. निर्मला उपाध्यायनाम्न्या विदुष्या विलिखितोऽयं ग्रन्थः **''नारीः ऋग्वेद के वातायन से''** शीर्षकं बिभर्ति। अत्र न केवलं वैदिकीनामृषिकाणां विस्तृतः परिचयोऽस्ति, वेदकाले नारीणां समाजे, राज्ये, परिवारे शिक्षायां च कीदृश-मादरणीयं स्थानमासीदित्यस्यापि सोदाहरणं विवरण-मुपलभ्यते। इत्थं हिन्दीभाषायां प्रकाशितेषु बहुषु ग्रन्थेषु वैदिककालीनानां विदुषीणां विस्तृतः परिचयः प्राप्यते इति महतः प्रमोदस्य विषयः।

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

**अनुशासनप्रियताः**- काशीविश्वविद्यालयतः एम. एस. सी. (प्राणिशास्त्रविज्ञाने) परीक्षां प्रथमश्रेण्यामुत्तीर्य श्रीमन्तो गुरवः नागपुरे परावर्त्य समागताः, कतिपय-मासानन्तरमेव च चेन्नईमत्स्यालये शोधकार्यार्थं गताः। तत्रापि जनेभ्यस्तेषां दृढानुशासनप्रियतायाः परिचयः सम्प्राप्तः। एकदा प्रयोगशालायाः प्रदर्शिनीमवलोकयितुं हैदराबादनगरस्य प्रशासकः (निजाम) तत्र समागतः। प्रदर्शिनीं द्रष्टुं जनेभ्यः शुल्कं निर्धारितमासीत् परं महापुरुषेभ्यस्तेभ्यः शुल्कं नैव ग्राह्यमिति विचारः प्रबन्धकानामासीत् तथापि गुरूणामाग्रहात्तैरपि शुल्कं प्रदायैव प्रवेशः प्राप्तः। 1923 ई. वर्षे तेषां पितृचरणानां सेवानिवृत्तिवशाद् गुरूणां चेन्नईनिवासा-र्थमावश्यकं धनप्रेषणमसम्भवमभूदतो गुरुभिः शोधकार्यमपूर्णमेव त्यक्त्वा नागपुरे प्रत्यावर्त्तनं करणीयमभवत्। तेषु दिवसेषु गुरवः स्ववयस्येभ्यो लिखितेषु पत्रेषु देशस्य क्रान्ति-कारिणामुग्रदेशभक्तेर्विषये तेषां मनसि जायमानां भावनां व्यक्तीकुर्वन्तिस्म।

**गुरुजीत्यभिधायाः हेतुः**- 1931 वर्षे अगस्तमासतः श्रीमन्तो गुरवः काशीविश्वविद्यालये अध्यापनकार्ये नियुक्ताः अभवन्। तस्मिन् कालखंडे माधवरावाणामनेके अद्भुता गुणाः प्रकटिता अभवन्। स्वछात्रेषु प्रगाढस्नेहवशात्ते तोषां सर्वप्रकारेण सहायतां कुर्वन्ति स्म। यदि कश्चिन्निर्धनच्छात्रः स्यात्तस्मै आवश्यकं पुस्तकं क्रीत्वा वितरन्तिस्म। परीक्षाशुल्कपूर्त्यर्थमपि वित्तीयसाहाय्यं कुर्वन्ति स्म। एतदर्थं स्ववेतनस्य विशालं भागं व्ययीकरणेऽपि त्ते आनन्दमनुभवन्ति स्म। स्वविषयस्यैव न, अन्यविषयाध्येतॄणां छात्राणामपि साहाय्यार्थं ते तान् विषयान् गम्भीरतयावगत्य साहाय्यं कुर्वन्तिस्म। एतादृशीं सहायतां कुर्वतां तेषां मनसि नासीत् काप्यपेक्षा। एतैः कारणैश्छात्रेष्वादरभावसमुद्भवादद्या-वधि माधवरावनाम्ना सम्बोध्यमाना गुरुजीनाम्ना सम्बोधिता अभवन्। श्रीमतां गुरूणां छात्रेषु प्रगाढं स्नेहमवलोक्य श्रीमन्तो मालवीयमहोदया अपि तेभ्य अतितरां स्निह्यन्तिस्म। द्राक्तरमहोदयैः संघकार्यविस्तारार्थं छात्ररूपेण प्रेषितानां भैयाजीदाणीमहोदयानां सम्पर्केण ते संघकार्यसम्पर्के समागताः। तत्रत्यशाखायाः संघचालका अप्यभवन्। अध्यापनावधेः समाप्तौ गुरवः परावर्त्त्य 1933 ई. वर्षे फर्वरीमासे नागपुरे समागताः। अत्र च विधिशास्त्राध्ययने रताः। 1935 ई. वर्षे विधिशास्त्राध्ययनं पूर्णं कृतम्।

**वंशो निर्वंशः स्यात्तेन किम्** :- अस्मिन्नन्तराले द्राक्तरमहोदयाः गुरुमहाभागानां सामीप्येन निरीक्षणं कुर्वन्तस्तान् सहवासे रक्षितुमपि प्रयत्नं कुर्वन्तिस्म। तेषां चासामान्यां कार्यक्षमतां बुद्धिप्रतिभां चावलोक्य तेभ्यो विशिष्टं दायित्वमपि प्रददतिस्म। 1934 ई. वर्षे अकोलानगरे सम्पन्ने संघशिक्षावर्गे सर्वाधिकारित्वस्य दायित्वं तैर्महत्या अवधानतया नैपुण्येन च सम्पादितम्। तेषु प्रवासेषु मधोर्विवाहविषयकं चिन्तनं मातापित्रोः स्वाभाविकमासीत्। गुरुमहाभागानां मात्रा साग्रहं विवाहप्रस्तावं स्थापयन्त्या कथितं यदि त्वं विवाहं न करिष्यसि गोलवलकरवंश एव निर्वंशो भविष्यति, समाप्तोभविष्यति। गुरुभिः कठोरशब्देषु कथितं

माद्दशामनेकेषां वंशसमाप्तावपि चेत्समाजस्य लाभः स्यादद्यतनीयायां परिस्थितौ तदप्यावश्यकम्। अतो नास्ति मे वंशनाशस्य चिन्ता। माता-पितृभ्यां द्राक्तर-महोदयेभ्योऽपि प्रेरयितुं कथितम्, तैः प्रेरितैस्तैः कथितं पूर्वं भवद्भिर्विवाहः कर्त्तव्यः अनन्तरमहं करिष्ये। एवं विवाहप्रस्तावस्य पूर्णविराम एव संजातः।

**जीवनदिशान्वेषणे संलग्नता** : - सहैव गुरवः स्वजीवनदिशां निर्णेतुं चिन्तनयुता आसन्। तस्मिन् समये तेषां मनसि उभयात्मकमाकर्षणमासीत्। मनसि संघर्ष एवासीत्। एकतो मनसि हिन्दुसमाजस्य घोरायाः दुर्दशायाः देशस्य दासतायाश्च पीडा प्रज्वलितासीत्, अपरतश्च तेषां जन्मजातायाः अध्यात्मिक्याः पिपासाया-स्तीव्रता। तेष्वेव दिवसेषु श्रीमद्भिः गुरुभिर्नागपुरस्थे रामकृष्णाश्रमे प्रमुखानां भास्करेश्वरानन्दमहाभागानां समीपे गमनागमनमारब्धम्। तत्र अमिताभमहाराजेन सह तेषां सौहार्दं प्रगाढमभूत्। ततस्तैर्ज्ञातं बङ्गदेशे सारगाछीमठे प. पूजनीयानां रामकृष्णमहाभागानां प्रत्यक्षशिष्याणां श्रीमतामखण्डानन्दमहाभागानामाश्रयो वर्त्तते। अमिताभमहाराजेनावगतिं प्राप्य आध्यात्मिक-सद्गुरोरन्वेषणे संलग्नाः गुरव एकस्मिन् दिने 1936 ई. वर्षे सहसा कमपि न कथयित्वा सारगाच्छ्याश्रमेऽगमन्। तेषां मात्रे पित्रेऽन्यस्मै अपि च अज्ञातमेवासीद् गुरवः कुत्र गताः। परमपूजनीयाः श्रीद्राक्तरमहोदयाः यदा तेभ्य अधिकाधिकं दायित्वं प्रदातुं विचारयन्तिस्म तदैव श्रीमन्तो गुरवः सहसा सारगाच्छ्यां गताः। मातृपितृ-तुल्यमेव द्राक्तरमहोदया अपि चिन्तानिमग्ना अभवन्।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **द्विसप्ततितमः प्रसङ्गः**

# ध्यानार्चनं-सेवा च

❑ **श्रीमती आराधना धर्माधिकारी**

एकस्मिन् दिने सन्तज्ञानेश्वरमहाभागाः प्रातर्नदीतीरे समागताः। तैरवलोकितं बालक एको जले निमज्जन् आक्रन्दति। पार्श्वे एव च संन्यास्येको नेत्रे निमील्योपविष्टः। ज्ञानेश्वरमहाभागैस्त्वरितमेव जले संकूर्द्य बालको रक्षितः। ततश्च सन्यासिनमाव्हयत्। संन्यासिना नेत्रे उद्घाटिते। ज्ञानेश्वरमहाभागाः अवदन्-किं ध्यानमग्नो भवान्। उत्तरं प्राप्तं ध्यानमग्नन्तु न मनः इतस्ततो धावति।

पुनश्च ज्ञानदेवेन प्रश्नः कृतः किं भवता जले निमज्जन् बालको न दृष्टः - उत्तरं सम्प्राप्तं दृष्टस्तु परमहं ध्यानकार्ये संलग्न आसम्। तदा ज्ञानेश्वरमहोदयाः बोधयन्त अवदन्-भवन्तो ध्यानकार्ये सफलाः कथं भवितुमर्हन्ति। भगवता भवद्भ्यः सेवायाः शोभनोऽवसरः प्रदत्त आसीत् तदेव च कर्त्तव्यमप्यासीत्- यदि भवता तत्पालितं स्यात्। ध्यानेऽपि मनः संलग्नं स्यात्। प्रभोः सृष्टिः प्रभोरुद्यानम्, यदि तस्य नाशो भवति तस्य संरक्षणं विधेयम्।

यदि भवतां पार्श्वस्थः क्षुधार्तः स्वपिति भवाँश्च पूजापाठे एव मग्नस्तदा नैवं चिन्तनीयं प्रभुकार्यं जायत इति। यतः क्षुधार्तस्तस्यैव स्वरूपम्। यं भवन्तः प्रसादयितुमिच्छन्ति। किं न स सर्वव्यापकः ?

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

# पं. गोपीनाथदाधीचकविवरेण विरचिते आनन्दनन्दनकाव्ये रसनिरूपणम्

❑ भारती शर्मा

जयपुरस्थसंस्कृतपाठशालायाम् अध्यापनधर्मं निर्वहन् जयपुरराजवंशस्य महाराज-रामसिंहद्वितीयस्य (1835 तः 1880 ई. पर्यन्तं) माधवसिंहद्वितीयस्य (1881 ई तः 1921 ई. पर्यन्तं) च लब्धाश्रयः कविः पं. गोपीनाथदाधीचः 1871 ई. तः 1914 ई. तमं वर्षं यावत् सारस्वतसाधनायां संलग्न आसीत्। साधनायाः सिद्धिरूपेण नैका रचनाः कवेः लेखन्याः उद्धृताः। तासु रचनासु आनन्दनन्दनम् अन्यतमा रचनाऽस्ति। दाधीचकविना विरचितेषु काव्येषु आनन्दनन्दनकाव्यं बृहत्तममस्ति। अस्मिन् काव्येऽमरकोशस्य पदानि प्रयुञ्जन् कविः स्वाराध्यं भगवन्तं कृष्णं भजति वर्णयति च। अस्मिन् लेखे आनन्दनन्दनकाव्यस्य रसालोचनं द्विधा कर्तुं मया प्रायतत। प्राक्तनसाहित्यशास्त्रोक्तमार्गेण आलोच्यते चेत् देवविषयकरतिः भावध्वनौ अन्तर्भवति। आधुनिककाव्यशास्त्रिभिः विशेषतः भक्तकविभिः सा रतिः भक्तिकाव्यत्वेनाङ्गीक्रियते। इत्थं द्वयोः मार्गयोः निरूपणमस्मिन् लेखे कृतमस्ति।

**आनन्दनन्दनकाव्यम् :-** पं. गोपीनाथदाधीच-कविना विरचितम् आनन्दनन्दनकाव्यं पञ्चसु वाटिकासु निबद्धं वर्तते। प्रथमायां मन्दारवाटिकायां 118 पद्यानि, द्वितीयायां पारिजातवाटिकायां 77 पद्यानि, तृतीयायां सन्तानवाटिकायां 71 पद्यानि, चतुर्थ्यां कल्पवृक्षवाटिकायां 40 पद्यानि, पञ्चम्यां च हरिचन्दनवाटिकायां 114 पद्यानि विलसन्ति। कविः ग्रन्थस्यास्यारम्भे एव 'अमरकोशोदाहरणरूपमिदम्' इति विलिख्य ग्रन्थ-रचनायाः प्रमुखप्रयोजनं स्पष्टमकरोत्। अवान्तर-प्रयोजनम्-कविः पञ्चसु वाटिकासु स्वाराध्यं भगवन्तं कृष्णं बहुविधं वर्णयति। तेन साकं भरतभूमि-मथुरानगरी-गोवर्धनपर्वत-वृन्दाटवी-रासमहोत्सवादीन् विषयान् अप्यवर्णयत्। एते विषयाः श्रीहरिणा सम्बद्धाः सन्ति अतः विषयभेदः न प्रतीयते।

**आनन्दनन्दनकाव्ये रसः** - काव्यस्य प्रधानसाध्यं रस एव वर्तते। यस्य परिपाकाय कवेः प्रयत्नः भवति। पाठकाः अपि तं रसरूपानन्दम् अवाप्तुं काव्यम् अधीयन्ते। यद्येवमुच्यते यत् काव्यस्य मूले रसास्वादनं वर्तते तदपि अतिशयोक्तिर्नास्ति। एतत् वाक्यं प्राचीनालङ्कारशास्त्रिणः सद्यः परनिर्वृतये, करोति कीर्तिं प्रीतिञ्च, वाक्यं रसात्मकं काव्यं, रमणीयार्थप्रतिपादकः शब्दः काव्यम् इत्यादिभिः वचोभिः समर्थयन्ते। आनन्दनन्दनकाव्यस्य रसालोचनं द्विधा भवितुमर्हति। प्राक्तनसाहित्य-शास्त्रोक्तदिशा आधुनिकदृष्टिकोणेन च।

**प्राक्तनसाहित्यशास्त्रोक्तदिशा रसः -**

**जातं वृष्णिकुलाम्बुधावतितरामामोदपूर्णं मनो,**
**नीलेन्दीवर-मेत्य सस्मितमुखं भृङ्गायमाणं भवत्।**
**नित्यं सञ्चर, यादृशी मधुरता लब्ध्वाऽत्र सा,**
**यूथिकामा-कन्दादितरुप्रसून-निकरे जाने न लेढा त्वया।।**

प्रस्तुते पद्ये कवेः श्रीकृष्णे व्यक्तः रतिभावः स्थायीभावो वर्तते। आलम्बनविभावः-श्रीकृष्णः, उद्दीपनविभावः-श्रीकृष्णस्य माधुर्यातिशायित्वम्। अनुभावः-मनः भ्रमराय प्रेरणम्, व्यभिचारिभावाः-

स्मृतिः इत्यादयः। इत्थमत्र देवविषयकरतिर्भावध्वनिः[1] वर्तते।

**आधुनिकदृष्टिकोणेन रसः** - पूर्वोक्तं पद्यं यदि आधुनिकदृष्टिकोणेन पश्यामश्चेत् भक्तिरसोऽस्ति। भक्ति-रसधारा वैदिकसाहित्यादारभ्य सम्प्रत्यपि प्रवाहितास्ति। साहित्यशास्त्रेऽपि एतस्य स्वीकरणं प्राचीनकालेऽभवत्। तद्भावध्वनेरन्तर्गतो भवतु नाम। परन्तु प्रामुख्येन स्वातन्त्र्येण च प्रायः द्वादशशतमायां शताब्द्यां वैष्णवभक्तैः एष रसत्वेन स्थापितः। ततः परं विपुलं भक्तिसाहित्यं साहित्यशास्त्रञ्च भक्तकविभिः प्रणीते। तादृशेषु प्रमुखाः आसन्-रूपगोस्वामी, जीवगोस्वामी, मधुसूदनसरस्वती, स्वामीकरपात्री च। एतैः विरचितेषु ग्रन्थेषु रूपगोस्वामिनः हरिभक्तिरसामृतसिन्धुः, उज्ज्वलनील-मणिश्च ग्रन्थद्वयं, मधुसूदनसरस्वत्याः श्रीमद्भगवद्भक्ति-रसायनम्, स्वामिकरपात्रिणश्च भक्तिरसार्णवः इत्येते भक्तिरसप्रतिपादकाः साहित्यशास्त्रीयग्रन्थाः प्रथिताः सन्ति। एतेषु भक्तिरसस्य बृहद्विवेचनं लभ्यते। रूपगोस्वामिना प्रधानभक्तेः-शान्तप्रीतप्रेयोवात्सल्य-मधुराः इत्येते पञ्चभेदाः स्वीकृतास्तथैव गौणभक्तेः हास्याद्भुतवीरकरुणरौद्रभयानकवीभत्साः इत्येते सप्त-भेदाः अङ्गीकृताः।[2] इत्थमाहत्य द्वादशप्रकाराः सन्ति भक्तिरसस्य।

वस्तुतः भक्तिं रसरूपेण स्वीकरणे कोऽपि दोषो नास्ति। यतोहि 'रसो वै सः' श्रुतिवाक्यं परमात्मानं रस-रूपेण स्वीकरोति। परमानन्दस्वरूपपरमात्मनः प्राप्तिमार्गः भक्तिर्वर्तते। भक्त्याऽपि साधक आनन्दं लभते अत्र साध्यसाधकावुभौ आनन्दरूपे स्तः केवलं स्तरभेदोऽस्ति। अतः भक्तिरपि रसो भवेत्। श्रीरामकृष्णादय आलम्बन-विभावाः सन्ति। तत्तद्देवानां कृपालुता, भक्तवत्सलतादयः उद्दीपनविभावाः भवन्ति। आराध्यमानानां गुणसङ्कीर्तनम् प्रेमाश्रुः रोमाञ्चादयोऽपि अनुभावाः वर्तन्ते। हर्षः, दैन्यं, मतिः, वितर्कः, स्मृतिः, त्रासः, आवेगः इत्यादयः व्यभिचारिभावाः भवन्ति। रूपगोस्वामिनोक्तेषु भक्तेः प्रधानपञ्चप्रकारेषु दाधीचकविना लिखितं काव्यमिदं शान्तभक्तिरसेन[3], दास्यभक्तिरसेन[4] च आप्लावितमस्ति।

---

1 रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः। भावः प्रोक्तः- आदिशब्दान्मुनि-गुरु-नृप-पुत्रादिविषया, कान्ताविषया तु व्यक्ता शृङ्गारः। मम्मटः, काव्यप्रकाशः, चतुर्थोल्लासः, चौखम्बासंस्कृत-संस्थानग् वाराणसी, 1990, पृष्ठसङ्ख्या 136

2 संस्कृत काव्य शास्त्र का आलोचनात्मक इतिहास, रेवा प्रसाद द्विवेदी, कालिदास संस्थान वाराणसी, 2007 पृष्ठ सङ्ख्या 443-445.

3. शान्तभक्तिरसः-स्वाविभावानुभावसात्त्विकसञ्चारिभिः परिपोष्य-माणा शान्तिरतिरेव शान्तभक्तिरसरूपेणाभिव्यज्यते। तस्य स्थायिभावः शान्तरतिः। नराकृतिश्चतुर्भुजः परामात्माविषयालम्बनरूपः, सनकसना-तनादयस्तपस्विनश्च ज्ञानिनो मुमुक्षां त्यक्त्वा श्रीकृष्णतद्भक्तकृपया भक्तिवासनायुक्ता यदि भवेयुस्तदा त आश्रयालम्बनानि। तत्त्वविचार-वनशैलादिवासिजनसङ्गसिद्धक्षेत्राद्या उद्दीपनविभावाः। नासिकाग्रदृष्टि-रवधूतचेष्टा निर्ममता भगवद्विद्वेषिजनेऽपि द्वेषराहित्यं तद्भक्तजनेऽपि नातिभक्तिर्मौनं ज्ञानशास्त्रेऽभिनिवेश इत्यादयोऽनुभावाः। अश्रुपातरोमा-ञ्चाद्याः प्रलयवर्जिताः सात्त्विकभावाः, निर्वेदमतिधृत्यादयः सञ्चारिणः सन्ति। कपिलदेव-ब्रह्मचारी, भक्तिरसविमर्शः, भारतीयविद्याप्रकाशनं वाराणसी 1989, पृष्ठ सङ्ख्या 259

4 प्रीतिभक्तिरसः/दास्यभक्तिरसः-स्वानुरूपैर्विभावानुभावसात्त्विकसञ्चारिभिः परिपुष्टा भगवद्विषयिणी प्रीतिरेव भक्तानां चेतसि समास्वाद्यतां प्राप्य 'प्रीतिभक्तिरस' सञ्ज्ञां प्राप्नोति। प्रीतिभक्तिरसस्य स्थायिभावो भगवद्-विषणियी रतिरेवेति। आलम्बनभावस्तस्य निष्कारणकरुणावरुणालयः अशरणशरण्यः, दिव्यगुणगणविशिष्टः, सुदृढव्रतः, सर्वज्ञः, सर्वरक्षकः, कर्तुमकर्तुमन्यथाकर्त्तुं समर्थः, सर्वशक्तिमान् परमाराध्यः परमात्मा विषया-लम्बनं तथा प्रभुनिदेशवशवर्त्तिनः, प्रभुताज्ञानविनम्धियः, विश्वस्ताः, आज्ञापालकाः, भगवद्विषयकश्रद्धावन्तः दासभावापन्नाः भक्ता आश्रया-लम्बनानि सन्ति। भगवदनुग्रहप्राप्तिः तत्पदरजः प्राप्तिः तद्भक्तानां सान्निध्यं, तेषां सत्सङ्गः, भुक्तावशिष्टप्रसादप्राप्तिः गुणगणश्रवणं कीर्त्तनं, मुरलीनादः, शृङ्गनादाादयश्चोद्दीपनभावा इति कथ्यन्ते। स्वकर्तव्यपालनं, स्वेष्टे परमनिष्ठा, भगवद्भक्तेषु द्वेषराहित्यं, तेषु मैत्रीभावः तद्भिन्नेषु वैराग्यश्चेति अनुभावाः भवन्ति। स्तम्भदयाः सर्वे सात्त्विकभावा भवन्त्यत्र। प्रायः सर्वे सञ्चारिभावाः स्वीक्रियन्ते।- कपिलदेवब्रह्मचारी, भक्तिरसविमर्शः, भारतीयविद्याप्रकाशनं वाराणसी 1989, पृष्ठ सङ्ख्या 160-61.

**शान्तभक्तिरसः -**

**दृश्ये नाशमुपागते जलनिधौ यः शेषशय्यागतः,**
**शिश्ये शान्तरजा उदैदथ ततो यन्नाभितो वारिजम्।**
**तज्जातश्चतुराननोऽसृजदिदं विश्वं स विश्वम्भरा-**
**भारं हर्तुमुपागतो वसतु मे श्रीवासुदेवो हृदि[5] ।।**

इत्यत्र चतुर्भुजः श्रीहरिः विषयालम्बनमस्ति। वासुदेवे भक्तिमान् कविः आश्रयालम्बनं वर्तते। सृष्टेः रचनादितात्विचारः उद्दीपनम्। ज्ञानशास्त्रेऽभिनिवेशोऽनुभावोऽस्ति। स्मृतिधृतिमतीत्यादयः व्यभिचारिभावाः सन्ति। कविनिष्ठहरिविषयकशान्तरतिः स्थायिभावः शान्तभक्तिरसत्वेनास्वाद्यते। शान्तरसात् शान्तभक्तिरसः भिद्यते। शान्तरसे साधकः ज्ञानमार्गमाश्रित्य दृश्यादृश्य-जगतः क्षणभङ्गुरतामवगम्य मुमुक्षुः भवति। परन्तु शान्तभक्तिरसे तस्य रुचिः मोक्षविषयं त्यक्त्वा प्रभुविषयिणी जायते अतः लक्ष्यभेदाद्रसभेदः।

**निर्मूलत्वमुपैति पातककुलं कृष्णाङ्घ्रिपद्माश्रिता**
**मुत्स्वाता, वसुधारुहस्त्वरयता यद्वत्सदागामिना।**
**चित्रं निर्व्यथनेषु सत्सु नवसु प्राणास्तनौ संस्थिता,**
**नास्थामत्र विधेहि धेहि न मनोरागं मृषेदं जगत्।।[6]**

जगतोऽसत्यतां शरीरनाशस्यावश्यंभावितां जानन्नपि कविः किल्बिषनिवहविनाशकश्रीकृष्णस्य चरणकमलम् आश्रयते न तु मुक्तिमार्गमवलम्बते अतः शान्तभक्तिरसः वर्तते।

**कालव्यापि च जङ्गमेतरमथेङ्गं वस्तु नो शाश्वतं,**
**विद्युत्कम्प्यमिदं च जीवितमतः सर्वातिरिक्तः प्रभुः।**
**आराध्यः परिहृत्य हृज्जठरतां श्रुत्येति सम्बोधितौ,**
**ध्यायं ध्यायमहं नयामि समयं कृष्णस्य पादाम्बुजे।।[7]**

विश्वस्यासत्यतां विश्वेशस्य च शाश्वततां जानन् कविः कृष्णचरणयोः ध्यानं कुर्वाणः समयं यापयति। इत्थमत्र शान्तभक्तिरसः आस्वाद्यते।

प्रीतिभक्तिरसः/दास्यभक्तिरसः -

कवेः प्रभुविषयकसमर्पणं दास्यभावं जनयति। यदनायासमेव कविकृतौ विलोक्यते यथा-

**आज्ञप्ता सुरनायकेन सरुषा कादम्बिनीरम्मदं**
**बिभ्राणा स्तनितेन दारितनगाऽऽसारैर्भुवं सिञ्चती।**
**स्फूर्जत्स्फूर्जथुना भयं विदधती प्राप्ता यदा भूधरे,**
**धृत्वा यो नखरे ररक्ष शरणान्स श्रीपतिर्मे गतिः।।[8]**

इत्यस्मिन् पद्ये शरणागतरक्षकः शक्तिमान् लक्ष्मीपतिः विषयालम्बनं कविश्चाश्रयालम्बनं, प्रभुणा धृतगोवर्द्धनगिरिवर्णनमुद्दीपनं, कवेः प्रभुविषयककथन-मिदमनुभावः हर्षः, गर्वः, दैन्यमित्यादयः व्यभिचारिणः भावाश्च सन्ति।

कस्यचिदपि भक्तस्य ईशप्रेम्णः साधनायाः द्वे अवस्थे भवतः साधकावस्था सिद्धावस्था च।।[9] साधकावस्था-यस्यामवस्थायां भक्तः प्रभोः परिचयं प्राप्नोति, शनैः शनैः प्रभोः सौन्दर्यांशं प्राप्य अतिशयेन आनन्दितो भवति। यावदानन्दः वर्धते तावद्विह्वलतापि वर्धते भक्तस्य। अनया व्याकुलतया प्रभावितः सः ईश्वरस्यानुनयं करोति दीनं वचः ब्रूते। कदाचिदुपालभते कदाचिद्वा आत्मानं पूर्णतः समर्पयति। दाधीचकवेः

5 गोपीनाथदाधीचः, आनन्दनन्दकाव्यं, मन्दारवाटिका (मातृका), पद्यसङ्ख्या 07
6 तत्रैव, पद्यम् 20
7 पं. गोपीनाथदाधीचः, आनन्दनन्दनकाव्यं, कल्पद्रुमवाटिका, पद्यसङ्ख्या 20
8 पं. गोपीनाथदाधीचः, आनन्दनन्दनकाव्यं, मन्दारवाटिका (मातृका), पद्यसङ्ख्या 30
9 तत्रैव, पृष्ठ सङ्ख्या 254

रसदृष्ट्या विभाजितेषु त्रिषु भागेषु प्रथमभागे यानि काव्यानि सन्ति। तेषु प्रायः आद्यन्त एषावस्थैव दृश्यते। यथा–

**दीनोऽहं भगवन् दयानिधिरिति ख्यातस्त्रिलोक्यां**
**भवानस्मात्त्वत्पदवासबद्धमनसं शंभो त्वमङ्गीकुरु।**
**शङ्खः शं कुरुताद्धरेर्मम सदा स्यान्नन्दको**
**नन्दकश्–**
**चक्रं चूर्णयतादघानि हरताद्धार्दं तमः कौस्तुभः।**
**नित्यं दुर्जनसङ्गतिं तु निहतात्कौमोदकी पक्षिराड्**
**भूत्वा स्यन्दनमुत्तमं नयतु मच्चेतो यशोदात्मजम्।।**[10]

एतेषु पद्येषु दीनोऽहं इत्यस्मिन् पद्ये कविः ईशकृपामवाप्तुं दीनवचांसि वक्ति। कमलाविलसिते–त्यादि पद्ये प्रभोः वन्दनापूर्वकं कविः आत्मोद्धाराय प्रार्थयते। पूर्वोक्ते शङ्खःशम् इत्यस्मिन् पद्ये कविः भगवतः विष्णोः सम्बद्धं प्रतिवस्तु नैकधा निवेदयति। इत्थं कवेः साधकावस्था स्पष्टतया दृश्यते। सिद्धावस्था–एषा भगवता स्वहृदे करोति। उभयोः मध्ये एकत्वं जायते। दाधीच–कविना लिखिते एकस्मिन् पद्ये एषावस्था दृग्गोचरी भवति– **त्वयि मयि भेदलवोऽपि न देव, तथापि च सेव्यतरोऽस्ति भवान्।।**[11] अत्र कवेः परमात्मनश्च एकरूपता प्रकटीभवति। समासतः वक्तुं शक्यते यत् आनन्दनन्दनकाव्यं प्रायः श्रीकृष्णेन सम्बद्धमस्ति। अस्मिन् काव्ये देवविषयियिणी रतिः एव प्रधाना वर्तते। तां रतिं भावध्वनिरूपेण उत भक्तिरससरूपेण स्वीकरणेन नास्ति काचन हानिः। उभौ मतौ स्वीकार्यौ स्तः।

**शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्,**
**जयपुरपरिसरः ( साहित्यशास्त्रविभागः )**

सन्दर्भग्रन्थसूची:– 1. आनन्दनन्दनकाव्यं (मातृका) पं. गोपीनाथदाधीचः, 2. भक्तिरसविमर्शः, कपिलदेवब्रह्म–चारी, भारतीयविद्याप्रकाशनं वाराणसी 1989, 3. संस्कृत काव्य शास्त्र का आलोचनात्मक इतिहास, रेवा प्रसाद द्विवेदी, कालिदास संस्थान वाराणसी, 2007, 4. संस्कृत वाङ्मय का बृद्ह इतिहास, आचार्यश्री बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थानं लखनऊ 2001, 5. रामचन्द्रपुष्पाञ्जल्यष्टकं (मातृका), पं. गोपीनाथदाधीचः, 6. काव्यप्रकाशः, मम्मटः, मोतीलाल बनारसीदास, देहली 1980

10. पं. गोपीनाथदाधीचः, आनन्दनन्दनकाव्यं, मन्दारवाटिका, पद्यसङ्ख्या 10
11. पं. गोपीनाथदाधीचः, रामचन्द्रपुष्पाञ्जल्यष्टकं (मातृका), पद्यसङ्ख्या 08

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

**भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।**

**खाते का नाम – भारती**
**खाता संख्या – 2139101912502**
**IFS Code - CNRB0002139**

# पाण्डुलिपीनां कालनिर्णयः

❑ विनोदकुमारशर्मा

पाण्डुलिपिषु विभिन्नकालगणनापद्धतीनां प्रयोगः कृतः। तेषां संवत्सराणां ज्ञानेन ऐतिहासिककालक्रमे पाण्डुलिपीनां उचितसमयज्ञानस्य लाभो भवति, सहैव एकसीमापर्यन्तं कालनिर्णयस्य समस्यायाः समाधान-मपि भवति। एतस्य परिज्ञानस्य इतिहासकाराय तु आवश्यकता भवत्येव, सहैव पाण्डलिपिपाठकानां छात्राणां कृतेऽपि महती आवश्यकता भवति।

प्राचीनाभिलेखानां पाण्डुलिपीनाञ्च तिथीनां निर्णयकरणं जटिला समस्या वर्तते। द्वादशीशताब्द्याः पूर्वतनाभिलेखेषु शक, संवदित्यादि उल्लेखो नास्ति। कतिपयअभिलेखेषु ''प्रवर्द्धमानसंवत्सरः'' अथवा ''विजयराज्यसंवत्सरः'' नाम्ना राज्ञः शासनवर्षस्य उल्लेखः कृतः। एतादृशानाम् अभिलेखानां संवत्सराणां विक्रमसंवत् अथवा शाके मध्ये परिवर्तनम् अन्य-सूचनानाम् अभावे संभवं नास्ति। येषु अभिलेखेषु शकसंवत्सरादीनाम् उल्लेखः नास्ति, तेषां कालनिर्णयः लिप्याधारेण भवितुं शक्नोति। प्रयुक्तलिपेः आधारेण कालनिर्णयः त्रुटिपूर्णः भवितुं शक्नोति। यतोहि लिपीनां प्रयोगस्य आरम्भतिथिः अथवा समाप्तितिथिर्न भवति। सम्पूर्णदेशे विभिन्न-लिपयः न तु सहैव प्रारब्धा न तु समाप्ता। कतिपयाक्षराणि यत्र-तत्र दीर्घकालात् प्रयुक्तानि भवन्ति। मौलाराम (1743-1833) महोदयेन लिखितासु पाण्डुलिपिषु 'इ' स्थाने; 'र' स्थाने ɿ, 'ब' स्थाने व, 'ख' स्थाने ष वर्णानां प्रयोगः प्राप्यते। यद्यपि संसारे एतादृशाः प्रयोगाः सामान्यव्यवहारे समाप्ताः। 'र' स्थाने 'ɿ' इत्यस्य प्रयोगस्तु वर्तमाने ऋ, त्र, स्र आदि रूपेषु लभ्यते। ईश्वरा द्वारा अंकिताया लाखामण्डले यादव-नरेशाणां प्रशस्तेः कालनिर्णयः लिप्या आधारेण अनेकशः विद्वद्भिः कृतः। अस्तु एतादृशेषु अभिलेखेषु कालनिर्णयाय समकालीन-सामग्रीणां विचारकरणं नितान्तमावश्यकं भवति।

कत्यूरीनरेशललितशूरस्य ताम्रशासनद्वयं प्राप्तम्, यत् लिप्या आधारेण नवमशताब्द्यां रचितं मन्यते। अस्मिन् ताम्रशासने निम्नसूचनाः सन्ति-

- प्रथम शासन-प्रवर्द्धमान विजयराज्य संवत्सरा-विंशतितमे माघ पदि 3 उत्तरायण संक्रान्ति।
- द्वितीय शासन-प्रवर्द्धमान विजयराज्य संवत्सर द्वाविंशतितमे कार्तिक पदि 15 विषुवत् संक्रान्ति।

कीलहौर्नमहोदयः महत्परिश्रमेण गणनां कृत्वा निष्कर्षं प्राप्तवान् यत् नवम्यां शताब्द्यां क्रमेण आगततिथीः संक्रान्तयश्च मेलनवर्षौ केवलं संवत् 910 तथा 911 आस्ताम्। तेन एतदाधारेण गणनां कृत्वा प्रथमताम्रशासनस्य तिथिः 22 दिसम्बर 853 ई. तथा द्वितीयताम्रशासनस्य 25 सितम्बर 854 ई. निर्धारिता।

हस्तलिखितग्रन्थेषु अभिलेखेषु च तिथिनिर्णयः संवत्सराणाम् आधारेण क्रियते यतोहि पाण्डुलिपिषु लेखकः अन्तिमपृष्ठे स्वजीवनवृत्तम् अनिवार्यरूपेण लिखति तत्रैव दिनाङ्कः ग्रन्थनिर्माणस्य प्रक्रिया अपि लिख्यते। पाण्डुलिपिषु प्रयुक्त संकेतानि निम्नानुसारेण सन्ति।

**विक्रमसंवत्सरः** - एष संवत्सरः मालवसंवत्सरः मानवकालः वा अपि कथ्यते। एतस्य प्रवर्तनं मालवगणराज्यस्य प्रमुखेन विक्रमादित्येन कृतम्। एतस्य संवत्सरस्य प्रारम्भः शकानां मध्यभारतात् निष्कासन-दिवसात् मन्यते। उत्तरभारते एतस्य प्रारम्भः चैत्र शुक्ला प्रतिपदातः तथा दक्षिणभारते कार्तिक शुक्ला प्रतिपदातः मन्यते।

**शकसंवत्सरः** - एतस्य संवत्सरस्य प्रारम्भविषये मन्यते यदेनं दक्षिणप्रतिष्ठानपुरस्य (पैठण) नृपः शालिवाहनः (सातवाहन, हाल) चालितवान्। पञ्चाङ्गेषु विक्रमसंवत्सरेण सह शाके (शकसंवत्सरस्य) उल्लेखोऽपि भवति।

**गुप्तसंवत्सरः** - एतस्य संवत्सरस्य प्रारम्भः गुप्तनरेशस्य चन्द्रगुप्तप्रथमस्य राज्यकालात् मन्यते। गुप्तसंवत्सरांकित जैनमूर्तिपीठिकारूपेण एकः अभिलेखः नैनीताल, उत्तराखण्डे प्राप्यते।

**ईस्वी सन्** - एतस्य संवत्सरस्य प्रारम्भः ईसाईमत-प्रवर्तकस्य 'ईसा' नामकमहापुरुषस्य कल्पितजन्मतिथि 1 जनवरी तः मन्यते। विक्रमसंवत्सरात् 57 निष्कासनेन तथा शकसंवत्सरे 78 योजनेन 'ईस्वी सन्' प्राप्तुं शक्यते। भारतवर्षे एतस्य प्रयोगः यूरोपीयजनानां भारते आगमनानन्तरं प्रारब्धः।

भारतीय एवं ईसाईतिथीनां निम्नपरिवर्तन तालिका लाभप्रदा भविष्यति -

| संवत्सरः | चैत्रारम्भवर्षः | पौषउत्तरार्द्धः माघ फाल्गुनस्य |
|---|---|---|
| विक्रम | वर्तमाने-58 न्यूनीकरणम्<br>व्यतीते-57 न्यूनीकरणम् | 57<br>56 |
| शक | वर्तमाने-77 योजनम्<br>व्यतीते-78 योजनम् | 78<br>79 |
| कलचूर | वर्तमाने-247 योजनम्<br>व्यतीते-248 योजनम् | 248<br>249 |
| गुप्त | वर्तमाने-319 योजनम्<br>व्यतीते-320 योजनम् | 320<br>321 |
| हर्ष | वर्तमाने-605 योजनम्<br>व्यतीते-606 योजनम् | 606<br>607 |

संवत्सराणां सम्बन्धे एका सूची ओझा महोदयेन स्वकीय ग्रन्थे 'भारतीय प्राचीनलिपिमाला' मध्ये दत्ता, यस्याः सम्पूर्णभारते प्रसृतानां संवत्सराणां विक्रमसंवत्सरे परिवर्तनस्य सूत्रं प्रकाशितम्-

| **सन्** | **प्रचलनक्षेत्रम्** | **प्रारम्भः** | **मासः सौरवर्षश्च** | **विक्रमसंवत्सरः** | **ईस्वीसन् निर्धारणम्** |
|---|---|---|---|---|---|
| विलायती सन् | उड़ीसा, बंगाल | सौर आश्विन अर्थात् कन्या संक्रान्तितः | चैत्रादि | 649-50 योजनेन | 592-93 योजनेन |
| अमली सन् | उड़ीसा | भाद्रपद्र शुक्ला 12 तः | - | - | - |
| बंगाली सन् | बंगप्रदेशे चिरग्रामः | सौरवैशाखे मेष संक्रान्तितः द्वितीयदिवसे | मासे सौरः | 650-651 योजनेन | 593-94 योजनेन |
| इलाही सन् | अकबरेण हिजरी सन् स्थाने प्रचालितम् | अकबरस्य राज्यारोहण दिवसात् | ईरानी मासाना-माधारेण | 1912 योजनेन | 1555-56 योजनेन |
| कलचूरी संवत् येरी संवतसरो वा | दक्षिण गुर्जरप्रदेशः कोंकण, मध्यप्रान्तः | 26 अगस्त 249 ई. तदनुसारं आश्विन शुक्ल प्रतिपदा 306 तः आरम्भः | - | 305-06 योजनेन | 248-49 योजनेन |
| भाटिक संवत्सरः | जैसलमेरजनपदः | राजभट्टिकेन प्रारब्धः | - | 680-81 योजनेन | 623-24 योजनेन |
| कोल्लम परशुरामवा संवत्सरः | मलाबार, कन्या-कुमारी पित्रैवेल्लि च क्षेत्राणि। | कन्या संक्रान्तिः सौर आश्विनतः | सौरमासानां नामानि संक्रान्तिः नामानुसारेण | - | 824-25 योजनेन |
| नेवार (नेपाल) संवत्सरः | नेपाल क्षेत्रे प्रचलितम् | 20 अक्टूबर 879 तदनुसारं कार्तिक शु. प्रतिपदा 936 वि.सं. चैत्रात् | - | गत नेपाल संवत्सरे 935-36 योजनेन | 878-79 योजनेन |

एतादृशपाण्डुलिपयः यत्र सन् संवत्सराणाम् उल्लेखः न भवति तत्र कालनिर्णयस्य निर्धारणं निम्नपद्धतिभिः क्रियते–

**बाह्यसाक्ष्यानिः** – एतेषामन्तर्गते काल–निर्धारणे निम्नतथ्यानि आश्रियन्ते–

– अन्य कविभिः उल्लेखः। – लोकप्रचलितानुश्रुतिषु उल्लेखः। – ऐतिहासिक घटनासु प्रसङ्गः। – सामाजिक–परिस्थितयः। – सांस्कृतिकोपादानानि।

**अन्तरङ्गसाक्ष्यानिः**– (क) अन्तरङ्गसाक्ष्यानां स्थूल पक्षः –

– लिपि – कर्गद–लिप्यासनम्। – लेखन–द्रव्यम्। –लेखन–पद्धतिः।, – अलंकरणम्। – अन्य साक्ष्यानि।

(ख) अन्तरङ्गसाक्ष्याणां सूक्ष्मपक्षः

–विषयवस्तु। – समय–वर्णनम्। – ग्रन्थस्य उद्धरणानि। –सांस्कृतिकवार्ताः। – ऐतिहासिककथाः। – सामाजिकपरिवेशः। – कवि–ग्रन्थकाराणामुल्लेखः।

(ग) भाषावैशिष्ट्यम्।

– व्याकरणगतं भाषावैशिष्ट्यम्।

– शब्दगतभाषावैशिष्ट्यम्। – लोकोक्तयः

वैज्ञानिकसाक्ष्यानिः – प्राप्तिस्थानस्य भूमिपरीक्षणम्। – वृक्ष–परीक्षणम्। – खनिजपरीक्षणम्।

संदर्भा :–


1. डबराल, लक्ष्मीविलासपार्थसारथि (1980) विश्व के प्राचीन संस्कृत अभिलेख, वाणी विलास प्रकाशन, ऋषिकेश पृ.सं. 20–21
2. डबराल, लक्ष्मीविलास पार्थसारथि (1980) विश्व के प्राचीन संस्कृत अभिलेख, वाणी विलास प्रकाशन, ऋषिकेश। पृ.सं.–23
3. बाशम, ए. एल. (1981) अद्‌भुत भारत, शिवलाल अग्रवाल एण्डकम्पनी, आगरा। पृ.सं.–497
4. ओझा, गौरीशंकर,(1959) भारतीय प्राचीन लिपिमाला, मुंशीराम मनोहरलाल कम्पनी, दिल्ली। पृ.सं. 193.



**शोधच्छात्रः**
**शिक्षा शास्त्रविभागः,**
**राष्ट्रिय संस्कृत-संस्थानम् जयपुरपरिसरः।**


# प्रियभारतं मे

❑ **डॉ. फिरोज**

**विभाति यत् भास्करवत् त्रिलोके,**
**सदा तनोत्यात्मयशः गुणैः स्वैः।**
**मही च यस्य प्रमुदास्ति वृक्षैः,**
**तदेव रम्यं प्रियभारतं मे।।**

**पुण्यैर्महद्‌भिर्मनुजैर्विनीतैः**
**धीरैः गभीरैस्तिलकादिभिर्यत्।**
**नीतं प्रसिद्धिं भुवनान्तरेषु,**
**तदेव रम्यं प्रियभारतं मे।।**

**हिमालयो यत्र ललामभूतः**
**गोदावरी-व्यास-चिनाबनद्यः।**
**रेवा च गङ्गा यमुना वहन्ति,**
**तदेव रम्यं प्रियभारतं मे।।**

**वेदान् षडङ्गैः सहितान् समस्तान्,**
**पुराणतन्त्रागमदर्शनानि।**
**बिभर्ति विज्ञः सततञ्च यस्य,**
**तदेव रम्यं प्रियभारतं मे।।**

**भाषाः विभिन्नाः, सुफलाश्च धर्माः**
**नाना कलाः यत्र समुल्लसन्ति।**
**कामाः मदीयाः फलिताश्च येन**
**तदेव रम्यं प्रियभारतं मे।।**


**सहायकाचार्यः (अ.), साहित्य-विभागः**
**राष्ट्रिय-संस्कृत-संस्थानम्, जयपुरपरिसरः,**
**जयपुरम्-302018**

# महिलाभ्यः प्रौढशिक्षा

❑ चरनसिंहः

कस्यापि देशस्य जनसंख्यायां महिलानां संख्या प्रायः अर्धा भवति। इदं जनसंख्यार्धम् उपेक्ष्य कोऽपि कार्यक्रमः सम्यक्तया प्रवर्तयितुं न शक्यते। विद्यमानायां सामाजिकसंरचनायाम् इदानीं यावत् महिलानामुपेक्षैव जायमाना वर्तते। नेयं स्थितिः प्रशंसास्पदा वर्तते। अशिक्षितार्धाङ्गं राष्ट्रं कथमिव प्रगतिपथमारोढुमर्हति।

महिलाशिक्षायाः महत्त्वम् :-

मानवीयसंसाधनानां पूर्णविकासाय, गृहाणां परिष्काराय, बाल्ये बालानां चरित्रनिर्माणाय महिलाः पुरुषाणामपेक्षया अधिकं महत्त्वमावहन्ति। अस्माकं संस्कृत्या इदं वैशिष्ट्यं वर्तते। यन् नारी समाजे पूजनीया आदरणीया च वर्तते। मनुरुदघोषयत् ''यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः।'' अनयोक्त्या तत्कालीने समाजे नारीः उद्दिश्य व्याप्तः आदरभावो लक्ष्यते एव, सा स्वयमपि आत्मानम् आदरयोग्यां कुर्यादित्यपि संकेतो लभ्यते। तत्तु शिक्षयैव सम्भाव्यते।

परिवारे यदि सुशिक्षिता नारी वर्तते, तर्हि सा तत्परिवारं प्रति तदीयं दायित्वं परिचेतुं निर्वोढुं च जागरूका तिष्ठति। तस्याः सन्ततिः सुशिक्षिता भवति। सुशिक्षिता नारी समाजस्य सुधारविषयेऽपि चिन्तयति। अतः यदि वयं समाजे सुधारमानेतुं वाञ्छामः, तर्हि नारीणां शिक्षा नूनं संकल्पनीया। आधुनिकसमये नार्याः क्षेत्रं गृहावधि सीमितं न, प्रत्युत विस्तीर्णं वर्तते। सा समानाधिकारैः युक्ता वर्तते। सा स्वयमपि परिवारं पालयितुम् आत्मानं समर्थां कर्तुमर्हति। विविधेषु व्यवसायेषु स्वीयां प्रतिभां विज्ञापयन्ती सा समाज-विकासाय प्रतिक्षेत्रं पुरुषेण सह समरूपं सहयोगं विधाय स्वीयमुत्तरदायित्वं निर्वहति। विकासशीलेषु देशेषु तस्याः कार्यं विशेषमहत्वं भजते, यत् तेषु देशेषु दारिद्र्य-क्षुधा-उपेक्षा अस्वस्थादीन् दोषान् विरुध्य प्रवर्तमाने युद्धे पुरुषैः सह नार्याः सहयोगः सततम् अनुभूयमानो वर्तते।

यद्यपि भारतस्य विद्यालयीयशिक्षायाः महाविद्यालयीयशिक्षायाश्च संख्यात्मकेषु प्रदत्तेषु उल्लेखनीयो विकासो लक्ष्यते, तथापि तत्र पुरुषाणामपेक्षया स्त्रीणां संख्या अति न्यूना वर्तते। एतत् अन्तरालं पूरयितुं साक्षरतायाः च शतप्रतिशतं स्थितिं प्राप्तुमिदं परमावश्यकं वर्तते यत् महिलानां साक्षरतायै प्रौढशिक्षायाः कार्यक्रमेषु विशेषावधानं प्रदीयेत।

**प्रौढमहिलाशिक्षायाः समस्याः -**

समाजे महिलानां साक्षरतायाः सम्पादनेन यत्परिवर्तनं परिकल्पितं वर्तते, तत्सम्बद्धया प्रौढशिक्षया तासां महिलानां साक्षरीकरणम् अभिप्रेतम्, याः 15-35 वयोवर्गम् अन्तर्गच्छन्ति। वर्गेऽस्मिन् आयुर्दृष्ट्या परिपक्वाः महिलाः सन्ति। याः नैकविधैः कारणैः प्राथमिकशिक्षां वा प्राप्तुमवसरान् नालभन्त, अपूर्णां वा प्राथमिकशिक्षां प्राप्य विस्मृतिपथमाश्रयन्त्यः पुनः निरक्षराः अभवन्। रामकुमारश्रीवास्तवः प्रतिपादयति यत् अस्मिन् वयोवर्गे याः महिलाः समागच्छन्ति ताः अन्धविश्वासानां, समाजस्य अव्यावहारिकीणां रीतीनां, कुप्रथानां च पाशे दृढं बद्धाः। तासां सन्ततिरपि अस्य पाशस्य दुष्परिणामं भुञ्जाना लक्ष्यते। भारतीये परिवेशे, विशिष्टा ग्रामीणक्षेत्रेषु महिलानां प्रौढशिक्षा नैक-समस्याभिमुखी वर्तते। एतासु समस्यासु आर्थिक्यः सामाजिक्यः, सांस्कृतिक्यः, शैक्षिक्यः, राजनैतिक्यश्च समस्याः प्रमुखाः वर्तन्ते।

**सन्दर्भ ग्रन्थानुसूची :-**

-डॉ. सुदेशकुमार शर्मा, प्रौढशिक्षा,जयपुर दीपमाधव प्रकाशन, -डॉ. रामशुक्ल पाण्डेय, प्रौढशिक्षा आगरा विनोद पुस्तक मन्दिर।

**( शोधार्थी )**

**रा. संस्कृत संस्थानम् जयपुरपरिसरः जयपुरम्**

# ‘ढूँढाड़ी’ लोकभाषायां स्वराणां वर्णनम्

❑ कानाराम कुमावतः

‘ढूँढाड़ी’ इति पदेन ‘ढूँढाड़’ प्रदेशस्य क्षेत्रस्य वा वागिति ज्ञायते। ‘ढूँढाड़’ इति पदेन राजस्थानप्रान्तस्य जयपुरप्रान्तस्य जयपुरजनपदस्य बोधो भवति तथा सहैव करौली-सवाई माधोपुर-टोंक-करौलीजनपदानां क्षेत्रमपि अस्मिन् क्षेत्रे सम्मिलितो भवति।

अस्मिन् क्षेत्रे या वाक् प्रचलिता वर्तते तस्याः स्वरूपं वयम् अत्र गद्यांशे पश्यामः- ‘‘म्हांका देखबा में अबार एक पोथी आई। ईंको सिरनामो छै पोथी ढूँढाड़ महातम की। पोथी में भविष्य पुराण में सूं देश को महातम लिख्यौ छै। मत्स्य देश में ही ढूँढाड़ सामल छै। ई में ईं देश की तीरथां, नद्यां और परबतां को बरणन और उत्पति लिखी छै। पोथी की भाषा संस्क्रित छै जीं को सार पढबालां का मनबैलाव और जानकारी कै तांई अंडै उतारां छै।[1]’’

उपर्युक्तगद्यांशः ‘ढूँढाड़महातम’ इति शीर्षकेण लिखितः। अस्य गद्यस्य लेखको वर्तते ‘श्रीगोपाल-नारायण बोहरा’। अधुना वयं ढूँढाड़ी लोकभाषायां ये स्वराः वर्तन्ते तान् विचारयामः।

सर्वप्रथमं ‘अ’ कारोपरि विचारयामः। ‘अकल/अकळ’, ‘अक्खड़’, ‘अनपढ़’, ‘अड़चण’, इत्यादिशब्देषु सर्वप्रथमं अकारस्य प्रयोगं वयं द्रष्टुं शक्नुमः। एवमेव ‘धरम’, ‘करम’ इत्यादि शब्देषु मध्ये अकारस्य स्वरस्य प्रयोगं वयं द्रष्टुं शक्नुमः।

आ इति स्वरस्य प्रयोगं ‘आज’, ‘आखा’, ‘आगै’ इत्यादि स्थानीयशब्देषु वयं प्रथमाक्षररूपेण पश्यामः एवमेव ‘खाट’, ‘जात’, ‘राजपूत’ इत्यादि शब्दानां मध्ये द्रष्टुं शक्यते।

इकारस्य उदाहरणेषु ‘इरंडी’, ‘इतरणो’, ‘इनै’ इत्यादि शब्देषु प्रथमाक्षरेण एवं ‘खिचड़ी’ ‘गिट’, ‘गिरह’ इत्यादि शब्देषु मध्यमाक्षररूपेण अस्ति। ‘ई’ इति स्वरस्य उदाहरणेषु ‘ईंट’, ईंकौ, ‘ईस’ इत्यादि शब्देषु प्रथमाक्षररूपेण तथा ‘कीड़ी’, ‘कीड़ौ’, ‘कीसौ’, ‘चींप’ इत्यादि शब्दानां मध्ये अन्ते वा वयं पश्यामः।

उकारः ‘ढूँढाड़ी’ वाचि पञ्चमः स्वरो वर्तते। अस्य उदाहरणेषु ‘उतावल’, ‘उगाल’, ‘उकेरणो’ इत्यादयः उकारस्य प्रथमाक्षरस्य उदाहरणानि सन्ति एवमेव ‘तुस’, ‘टुकडी’, ‘नुकस’ इत्यादिशब्दाः मध्यमाक्षरस्य उदाहरणानि सन्ति।

दीर्घ ऊकारस्य उदाहरणेषु ‘ऊखल’, ‘ऊँदरी’, ‘ऊपरालौ’ प्रथमाक्षरस्य तथा ‘गूंद’, ‘चूक’, ‘छूत’ इत्यादि मध्यमस्वरस्य उदाहरणानि सन्ति। एकारस्य उदाहरणेषु ‘एतराज’ ‘एकलो’ ‘एलम’ तथा ‘गेड़ौ’ ‘जेवड़ा’ ‘देर’ इत्यादयः शब्दाः सन्ति। ऐकारस्य उदाहरणेषु ‘ऐ’ ‘ऐब’ तथा ‘जै-जैकार’, ‘रैल’ इत्यादयः सन्ति।

ओकारस्य उदाहरणेषु ‘ओलाद’, ‘ओलख’, ‘ओढ़णी’ तथा ‘धमाको’, ‘ढोल’, ‘तोला’ इत्यादयः शब्दाः सन्ति। औकारस्य उदाहरणेषु ‘औजार’, ‘औतार’, ‘औलाद’ तथा ‘टाळौ’, ‘दौलत’, ‘धौक’ इत्यादयः शब्दाः सन्ति। अनुस्वारयुक्तस्य अकारस्य उदाहरणेषु ‘अंधेर’, ‘अंगुल’, ‘अंकुरण’ इत्यादयः शब्दाः विद्यन्ते।

संस्कृते ऋकारस्य लृकारस्य च स्वरेषु गणना भवति परञ्च ‘ढूँढाड़ी’ लोकवाचि ऋकारस्य लृकारस्य च न

भवति गणना स्वरेषु। अत्र सामान्यतः 'ऋषि' इति स्थाने 'रिषि' इति उच्चार्यते एवमेव 'ऋतु' इत्यस्य स्थाने 'रितु' इति पदं भवति एवमेव 'मृग' इत्यस्य स्थाने 'म्रग' इति तथा 'वृथा' इति पदस्य 'बिरथ ही' पदस्य प्रयोगाः दृश्यन्ते।

अत्र वयं ऋकारस्य अन्यस्वरेषु परिवर्तनमपि द्रष्टुं शक्नुमः –

| संस्कृतशब्दः | ढूँढाड़ी लोकभाषायां वर्णाः | ऋकारस्य अन्यस्वरेषु परिवर्तनम् |
|---|---|---|
| तृणम् | तण | अकारे |
| शृंखला | सांकल | आकारे |
| शृंगारः | सिणगार | इकारे |
| घृतम् | घी | ईकारे |
| पृथ्वी | पुहमी | उकारे |
| वृक्षम् | रूँख | ऊकारे |
| दृश् | देख | एकारे |

एवमेव त्रकारस्य अन्यस्वरेषु परिवर्तनमभवत् तथा लृकारस्य तु ढूँढाडीलोकवाचि लोप एवाभवत् इति।

1 राजस्थानी गद्य संकलन-राजस्थानी ग्रन्थागार जोधपुर (2014) पृष्ठसंख्या 37

**गवेषकः (व्याकरणे)**
**राष्ट्रीय-संस्कृत-संस्थानम्, जयपुरपरिसरः**

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**(15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः)**

**वरं पातो महावह्नौ न च मोहाग्निदुर्गमे।**
**भवैकं हि दहेद् वह्निरनन्तभवदुःखदे।।**

– महा अर्थात् प्रचण्ड अग्नि में गिरजाना श्रेष्ठ है, परन्तु मोहरूपी अग्नि के दुर्गम स्थान में रहना ठीक नहीं है। क्योंकि अग्नि तो एक ही भव में शरीर को जलाती है, परन्तु मोहरूपी अग्नि अनन्त भवों तक दुःख दायक है।

**दुःखाकरं दुर्गतिदानदक्षं पापारिगेहं गुणधर्मशत्रुम्।**
**मोहादिपाशं परमार्थशून्यमाशाकरं त्वं त्यज भो नु गेहम्।।**

– जो दुःखों की खान है, दुर्गति देने में समर्थ है, पाप रूपी शत्रु का घर है, गुण तथा धर्म का शत्रु है, मोहादि के पाश (जाल) से युक्त है, परमार्थ (दान, धर्म) से शून्य है, आशा और तृष्णा को उत्पन्न करने वाला है, उस घर को छोड़ देना चाहिये।

**सप्तधातुमये देहे रोगप्रचयपूरिते।**
**को ज्ञानी रमतेऽसारे दुर्गन्धा मेध्यमन्दिरे।।**

– सप्त धातुओं से युक्त देह में, जो रोगों के समूह से भरा है, दुर्गन्ध और अवित्रता का घर है, ऐसे निस्सार शरीर में कौन ज्ञानी रमण करे।

**अनेकवस्त्रताम्बूलैरन्नपानैश्च पोषितम्।**
**जीवेन सह नो याति शरीरं दुर्जनादिवत्।।**

– अनेक वस्त्र, ताम्बूल, और अन्नपान आदि के द्वारा जो शरीर पुष्ट किया जाता है, वह शरीर दुर्जन मनुष्यों के समान जीव के साथ नहीं जाता है।

**देहं पुष्णाति यो मूढो नित्यं तस्य प्रयच्छति।**
**अत्रामुत्र धनं रोगं दुर्गतिं तस्य सर्पवत्।।**

– जो मूर्ख मनुष्य नित्य शरीर को पुष्ट करता है, उसके लिये यह शरीर सर्प के समान इस जन्म में अत्यधिक रोग और पर जन्म में दुर्गति को प्रदान करता है।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# उपमालङ्कारनिरूपणेऽप्पयदीक्षित-आशाधरभट्टमतसमीक्षा

❑ भोपालरामः रेबारी

अप्पयदीक्षितमतानुसारमुपमालंकारः न केवलं सादृश्यमूलकोऽलंकारोऽस्त्यपितु साधर्म्यमूलकोऽप्य-लंकारोऽस्ति। सर्वेषां सादृश्यमूलकानां साधर्म्यमूलकानां चालंकाराणामयमेव आधारभूतोऽस्ति। उपमाया वैशिष्ट्यं प्रतिपादयन्नसौ चित्रमीमांसायामुल्लिखति-

**''उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।**
**रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः।।''** [1]

अर्थात् उपमैव सा नर्तकी अस्ति या नानाविधालं-कारभूमिकायां काव्यमञ्चे स्वावतरणं कुर्वाणा काव्यरसज्ञानां मनो ह्लादयन्ती वर्तते।

कुवलयानन्दे **''उपमा यत्र सादृश्यलक्ष्मीरुल्ल-सति द्वयोः''** इति चन्द्रालोककारस्य मतं सः स्वीकरोति। यद्यपीदं तस्य स्वोपज्ञं लक्षणं नास्ति तथापि अस्य वृत्तिं उद्दिश्यैव आशाधरभट्टेनापि सादृश्यलक्ष्मीरित्यस्य चारुत्वशोभेत्यर्थं प्रतिपाद्य सहृदयाह्लादकत्वपक्ष एवोपस्थापितः।[2]

अस्योपमालंकारस्य लक्षणद्वयं दीक्षितमहोदयेन प्रस्तुतं चित्रमीमांसायाम्। तत्रादौ सादृश्यसापेक्षं लक्षणं निर्दिष्टम्। यथा-

**''उपमितिक्रियानिष्पत्तिमत्सादृश्यवर्णनमुपमा।''**[3]

अर्थात् यस्मिन् सादृश्यवर्णने उपमितिक्रियाया निष्पत्तिर्लक्ष्यमाणा स्यात् तस्मिन् वर्णने उपमानामालंकारो भवति। द्वितीयं तु वैधर्म्यनिरपेक्षं लक्षणं विनिर्दिष्टम्। यथा-**''स्वनिषेधपर्यवसायिसादृश्यवर्णनमुपमा।''**[4]

अर्थात् यत् सादृश्यवर्णनं स्वनिषेधे पर्यवसितं न स्यात् तस्मिन् सादृश्यवर्णने उपमालंकारस्य स्थितिर्भवति।

उपर्युक्तलक्षणद्वयप्रस्तुतेरनन्तरं सः प्रतिपादयति यत् उपमायाः कृते यत् सादृश्यमपेक्षितं भवति तद् अदुष्टं स्यात् अव्यंग्यं च स्यात्। यतोहि दुष्टत्वेऽलंकारक्षतिः स्यात् व्यंग्यत्वे च ध्वनिर्नामालङ्कारमात्रत्वम्। अतएव स उल्लिखति- **''अलंकारभूतोपमालक्षणं त्वेतदेवादुष्टा-व्यंग्यत्वविशेषितम्।।''**[5] इति

कुवलयानन्देऽपि व्यंग्यविरहत्वपक्षः व्यंग्यादुष्टत्व-पक्षश्चोपस्थापितः। उल्लिखितश्च तत्र-यत्रोपमानोपमे-ययोः सहृदयाह्लादकत्वेन चारुसादृश्यमुद्भूततयोल्लसति व्यंग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालङ्कार इति। आशाधरभट्टोऽत्र स्वर्गङ्गावगाहनेन स्वर्यावत्कीर्तिप्रसारः इति व्यंग्यार्थो ग्राह्योऽपि चेन्न दुष्टत्वम् इति दर्शयति।[6]

एवमुपमालक्षणं प्रस्तूय दीक्षितमहोदयस्तस्य भेदद्वयं प्रतिपादयति-पूर्णोपमा लुप्तोपमा चेति। पूर्णोपमायां साधारणो धर्मः सविशेषो भवति। स च दीक्षितमतेन सप्तधा भवितुं शक्नोति। यथा- (1) अनुगामिरूपः (2) वस्तुप्रतिवस्तुभावरूपः (3) बिम्बप्रतिबिम्बभावरूपः (4) श्लिष्टः (5) औपचारिकः (6) समासान्तराश्रितः (7) मिश्रितश्च।[7] लुप्तोपमायां यत्र साधारणधर्मो भवति तत्र सः साधारणो धर्मः केवलमनुगामिरूप एव भवति। यद्यपि पण्डितराजजगन्नाथः दीक्षितस्य मतमिदं सप्रमाणं खण्डयति। स उल्लिखति यत्- **''मलय इव जगति पाण्डुर्वल्मीक इवाधिधरणि धृतराष्ट्रः''** इत्याद्युदाहरणे सत्यामपि लुप्तोपमायां साधारणो धर्मः बिम्बप्रतिम्ब-भावरूपो भवितुं शक्नोति।[8]

पण्डितराजस्य इदं मतं कुवलयानन्दस्य परवर्ति-भिष्टीकाकारैः खण्डितम् तथा हि रसिकरञ्जनीकारः चन्द्रिकाकारः दीपिकाकारश्च सर्वे इदमेव प्रतिपादयन्ति यद् धर्मस्य पृथगुपादानत्वे सत्येव धर्मलुप्तोपमादिभेदेषु बिम्बप्रतिबिम्बभावो भवितुं शक्नोति। दीक्षितमहोदया अत्र धर्मस्य पृथगुपादानत्वपक्षं नोपस्थापयन्ति। तेषां

कथनं लुप्तोपमायाः सामान्यस्वरूपं लक्ष्यीकृत्य प्रस्तुतं वर्तते, न तु किमपि भेदविशेषमधिकृत्य।[9]

दीक्षितमहोदयाः मिश्रितसाधारणधर्मस्यानेकान्युदाहरणानि प्रस्तुवन्ति किन्तु एकस्मिन्नप्युदाहरणे नानाविधसाधारणधर्माणामुपस्थितिर्भवितुमर्हतीति तन्मतं स्पष्टमेवास्ति। उदाहरणार्थम् अधोलिखितं पद्यं चिन्तनीयमस्ति–

**''नृपं तमावर्त्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री।**
**महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव।।''**[10]

उदाहरणेऽस्मिन् इन्दुमती उपमेयभूताऽस्ति स्रोतोवहा उपमानभूताऽस्ति। त्रयश्चात्र वर्तन्ते साधारण-धर्माः- व्यत्यगात्, अन्यवधूर्भवित्री-सागरगामिनी, आवर्त्तमनोज्ञनाभिश्च। अत्र प्रथमोक्तः, साधारणो धर्मः अनुगामिधर्मोऽस्ति। द्वितीयोक्तः साधारणो धर्मः बिम्बप्रतिबिम्बभावरूपो धर्मोऽस्ति। तृतीयोक्तश्च साधारणो धर्मः समासान्तराश्रितोऽस्ति।

एवमन्यत्रापि यथाधोलिखितोदाहरण पद्ये–

**''असौ मरुच्चुम्बितचारुकेसरः,**
**प्रसन्नताराधिपमण्डलाग्रणीः।**
**वियुक्तरामातुरदृष्टिवीक्षितो,**
**वसन्तकालो हनुमानिवागतः।।**[11]**''**

अत्रानेके साधारणधर्माः सन्ति। तथा हि 'आगतः' 'आतुरदृष्टिवीक्षित' श्चेत्युभौ अनुगामिधर्मौ स्तः, मरुच्चुम्बितचारुकेसरः इत्यत्र श्लेषोपचारयोर्मिश्रणमस्ति। 'केसर' इत्यत्र श्लिष्टार्थत्वमपि साधारणधर्मस्यान्यद्रूपान्तरमस्ति। 'ताराधिपमण्डल' इत्यत्रोभयार्थकः साधारणो धर्मोऽस्ति।

लुप्तोपमायाः प्रकरणे तु अष्टौ भेदाः दीक्षितमहोदयेन सोदाहरणं संकेतिताः। तत्पश्चात् तेन मम्मटादिप्रतिपादितानां पञ्चविंशत्युपमानभेदानां (षट् पूर्णाभेदानां, एकोन विंशतिर्लुप्ताभेदानां) चापि संकेता विहिताः। व्याकरण-शास्त्राधारित भेदान् प्रति दीक्षितः स्वारुचिं प्रकटयति। यथा–

**''एवमयं पूर्णालुप्ताविभागो वाक्यसमासप्रत्यय विशेषगोचरतया शब्दशास्त्रव्युत्पत्तिकौशल-प्रदर्शनमात्रप्रयोजनो नातीवालंकारशास्त्रे व्युत्पाद्यतामर्हति।।**[12]**''**

उपमाप्रकरणस्योपसंहारे उपमायास्तिस्रो विशेषता अपि दीक्षितमहोदयैः प्रतिपादिताः मौलिकताया दृष्ट्या ता अत्र चिन्तनीयाः सन्ति–[13]

(1) स्ववैचित्र्यमात्रविश्रान्ता- अर्थात् उपमाया अर्थचमत्कृतिः यत्रान्यार्थं न पोषयेत् तत्रैवोपमालंकारः स्वीकार्यः।

(2) उक्तार्थोपपादनपरा- यत्र किमपि प्रतिपादितं विषयं स्पष्टीकर्तुं प्रतिपाद्ये काव्यादौ उपमात्वेन तदर्थ-प्रयोगो विधेयस्तत्रोपमालंकारः स्वीकार्यः।

(3) व्यंग्यप्रधाना - यत्र वाच्यार्थगतोपमा कस्यचिदपि व्यंग्यस्य वस्तुनोऽलंकारस्य रसादेर्वा उपस्कारकत्वं नीयेत तत्राप्युपमालंकारः स्वीकार्यः।

दीक्षितमहोदयः षडुपमादोषानपि निर्दिशति 14- ''न्यूनत्वमधिकत्वं लिङ्गभेदो वचनभेदोऽसादृश्यम-सम्भवश्चेति। यद्यप्येतेषामपवादाः अपि भवितुमर्हन्ति किन्तु उपमाप्रयोगे विद्वद्भिः सामान्यतया एते दोषास्तु परिहार्या एवेत्यलम्।''

**पादटिप्पणयः** 1. चित्रमीमांसा- (पण्डित पुस्तकालय, गायघाट, वाराणसी, वि.सं. 2044 पृ.-6
2. कुवलपानन्दः (चौखम्बा वि.भ., 2005) 1/6 वृत्तिः
3. चित्रमीमांसा - पृ. 20 4. चित्रमीमांसा - पृ. 20
5. चित्रमीमांसा - पृ. 20
6. अलंकारदीपिका, (आशाधरभट्टः, निर्णयसागरः, मुम्बई, शकाब्दः 1808) पृ. 2 7. चित्रमीमांसा - पृ. 23
8. रसगंगाधरः (पण्डितराज-जगन्नाथः, सम्पूर्णानन्द संस्कृत वि.वि. वाराणसी, 1977), आ. 2/पृ 372
9. अलंकारदीपिका, पृ. 3 10. रघुवंश सर्गः, 6/52
11. ऋतुसंहारे वसन्तवर्णने 12. चित्रमीमांसा - पृ. 31 13. चित्रमीमांसा - पृ. 33 14. चित्रमीमांसा - पृ. 34

**शोधछात्रः**
**जयनारायण व्यास वि.वि. जोधपुरम्।**

# गो महिमा

❑ नानूराम जाट

अस्माकं भारतदेशः कृषिप्रधानो देशोऽस्ति। भारतीयाः जनाः गो महत्त्वं जानन्ति। भारतीयाः जनाः तां धेनुं मातरम् इति कथयन्ति। कृषकाणां जीवनम् इयं धेनुः एव अस्ति। माता पुत्रान् स्वदुग्धेन पोषयति, तथा धेनुः अपि स्वगुग्धेन मानवान् पोषयति अतः एव भारतीयाः जनाः तां गां मातरम् इति कथयन्ति।

वेदेषु उक्तं ''गावो विश्वस्य मातरः'' इति उक्तिः धेनूनां महत्त्वं सुष्ठु प्रतिपादयति। गौः सर्वेषां कृते कल्याणकारिणी अस्ति। प्राचीन काले श्रीकृष्णः धेनूः अचारयत् अतः सः गोपालः इति नाम्ना प्रसिद्धः अभवत्। भगवतः श्रीकृष्णस्य एतादृशः सङ्कल्पः आसीत्।

**गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।**
**गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्।।**

प्राचीनकाले राजानः श्रेष्ठिनश्च गोदानं कुर्वन्तिस्म। तस्य पालनस्य महती आवश्यकता वर्तते।

भारतीया धेनवः अनेकवर्णीयाः भवन्ति। तासु कपिलायाः धेनोः अत्यधिकं महत्त्वम् अस्ति। मातुः दुग्धानन्तरं धेनुदुग्धम् एव सर्वाधिकं सुपाच्यं, पौष्टिकं वर्धकं च भवति। अत एव धेनुभिः सह मातृतुलना कृता। प्राचीनकाले महर्षि वशिष्ठस्य समीपे एका धेनुः आसीत्। तस्या नाम नन्दिनी आसीत्। सन्तानहीनः राजा दिलीपः तस्याः सेवामकरोत्। सः नृपः तस्याः सेवया वीरपुत्रम् अलभत। तस्य पुत्रस्य नाम रघुः आसीत्।

धेनोः दुग्धात् दधिः नवनीतं घृतं तक्रं मिष्टान्नं च जायन्ते। तक्रेण घृतेन च प्राणरक्षकाः अनेकाः औषधयः निर्मिताः भवन्ति। भारतीयचिकित्साग्रन्थेषु धेनोः मूत्रं पुरीषं दधि घृतं पञ्चगव्यरूपेण वर्णितम्। गोमूत्रं अनेकासु औषधिषु अपि प्रयुक्तं भवति। गोमयेन वयं स्वगृहान् पवित्रीकुर्मः।

गोमयस्य उपयोगः जैविक उर्वरकरूपे अधुनाऽपि क्रियते तेन शस्यानां वृद्धिः जायते। अस्माकं देशे धेनुपालनम् आवश्यकं मन्यते। यदि अत्र धेनवः न भवेयुः तदा कुतः पयः? कुतो घृतम्? कुतः बलम्? कुतः स्वास्थ्यम्? किमधिकं धेनूनां षडङ्गा परमं माङ्गल्यं प्रोक्तम्। यथा–

**गौमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना।**
**षडङ्गमेतत् परमं माङ्गल्यं सर्वदा गवाम्।।**

पञ्चगव्यस्य उपयोगो मानसिक व्याधिषु कीट–नाशकरूपे गृह व्यवस्थायां पाण्डुरोगस्य चर्मरोगस्य, क्षयरोगस्य च निवारणार्थं भवति। अनेन सिद्धयति यत् गौः अनेकेन प्रकारेण अस्माकं मातृवत् रक्षां करोति।

धेनवः विविधवर्णाः भवन्ति। ताः शस्यं चरन्ति तृणानि च खादन्ति। धेनवः अमृतमयं दुग्धं यच्छन्ति। धेनवः स्वभावेन सरलाः भवति। धेनोः वत्साः वृषभाः भवन्ति। बालकाः वत्सेषु स्निह्यन्ति। धेनूनां दुग्धं पीत्वा वत्साः बलिष्ठाः पुष्टाश्च भवन्ति। बलीवर्दाः क्षेत्राणि कृषन्ति भारं च वहन्ति। बलीवर्दाः कृषकानां मित्रं भवन्ति। अधुना गोसंरक्षणस्य परमावश्यकता वर्तते। वर्तमान–समये सर्वकारेणाऽपि संरक्षणकृते अनेकाः योजनाः आयोज्यन्ते। यथा गोशालायाः निर्माणं कृत्वा धेनुभ्यः कृते घासं बुसं च ददति।

एतादृशी गौ–रूपेण वर्णिता माता यस्या राधनमात्रेण मानवस्य सकलानां मनोरथानां पूर्तिर्जायते। धेनूनां गाथामाकर्ण्य वयमपि चिन्तयामः तासां कृते किमपि कुर्मः। तस्याः कृते समाजस्य उपेक्षा वृत्तिः निराकरणीया प्राचीनकालेऽपि ऋषि–मुनयोऽपि गोमहिमानं गायन्ति। आश्रमे अनेकाः धेनूः पालयन्ति, ब्रह्मचारिणः धेनोः दुग्धं पिबन्ति।

**शोधार्थीः:**
**( साहित्यविभाग ) ज.रा.रा.सं.वि.वि. जयपुरम्**

नारी-स्तम्भः

# ऋषिकल्पा-लक्ष्मी कुट्टी

❑ डॉ. राजेश्वरी भट्ट

'न रत्नमन्विष्यति मृग्यते हि तत्' शास्त्रवचनानीमानि प्रत्यक्षं कुर्वती दाक्षिणात्या 'श्रीमती लक्ष्मी कुट्टी' गहनवने तालपत्रैर्निर्मिते कुटीरे वासं विद्यत्यपि आत्मनोऽनन्यसामान्यगुणानुरोधेन 2018 तमे वर्षे समायोजिते गणतन्त्रदिवससमारोहे पद्मश्री इति दुर्लभसम्मानेन सभाजयितुं राष्ट्रस्य राजधान्यां दिल्लीनगर्यां सादरम् आमन्त्रिता। गुणानां खनिः लक्ष्मी कुट्टी 1943 तमे वर्षे केरलप्रदेशे गहनवने जनिमलभत। चिकित्सासुविधानां अत्यन्ताभाववति गहनवनेऽस्मिन् लक्ष्मीकुट्या जननी प्रसविका इति सेवाकार्ये समर्पिताऽऽसीत्। प्राश्वर्वर्तिषु प्रदेशेषु प्रसवसमये पीड़ितानां नारीणां पीडानिवारणाय भवतु शीतम्, आतपो, दिवा रात्रिर्वा सा सदैव तत्पराऽऽसीत्। अस्मिन् क्रमे चिकित्साव्यवस्थाया अभावे लक्ष्म्याः जननी वनेभवाभिः मूलपत्रपुष्पादिभिः निर्मिताभिरोषधीभिः तासां पीडितानां नारीणां पीड़ाहरणे क्षमाऽभवत्। मातुः समीपे निवसन्ती लक्ष्मी अपि सहजेनैव पारम्परिकेन, आत्मनोऽन्तश्चेतनया स्फुरितेन ज्ञानेन च वनौषधीनाम् अभिज्ञाने, निर्माणे च नैपुण्यमधिगतवती। लक्ष्मीकुट्टीमहाभागायाः चिकित्सानैपुण्यं श्रुत्वा पार्श्ववर्तिभ्यः क्षेत्रेभ्यः विविधरोगग्रस्ता रोगिणः चिकित्साऽऽवाप्तये वने आगच्छन्ति। विशेषेण सर्पदंशेन पीडिता, रोगान्तरेण च ग्रस्ता जनाश्चिकित्सालाभाय दूरदूरतरेभ्यः, स्थानेभ्यः लक्ष्म्या निवासस्थले आगच्छन्ति। सहृदया लक्ष्मी कुट्टी रोगिणां कष्टानि हर्त्तुं सदैव तत्परा दृश्यते। अस्मिन् क्रमे पञ्चशतं (500) जना लाभान्विता जाताः। ज्ञायते यत् सततं नवनवीनानां ओषधीनां शोधकार्ये संलग्ना 'लक्ष्मीकुट्टी' सम्प्रति पञ्चशतम् (500) विधानामौषधीनां प्रयोगेण रोगिणां पीडाहरणे समर्थाऽस्ति। लक्ष्मीकुट्याः चिकित्साकौशलेन चमत्कृतेन केरलसर्वकारेण इयं 'नट्टूवैद्यरत्न' इति प्रशंसनीयेन उपाधिना विभूषिता कृता। आत्मनो विहितेन निःस्वार्थसमर्पणेन, सेवासंकल्पेन च ऋषिकल्पा 'लक्ष्मीकुट्टी' पार्श्ववर्तिप्रदेशेषु वनामुथस्सी (जंगल की दादी) इति आत्मीयेन सम्बोधनेन सम्बोध्यते। सततं सेवाकार्येषु संलग्नाऽपि लक्ष्मीकुट्टी सर्वथा सन्तुष्टा नास्ति। सम्प्रति वनवासिनां कृते चिकित्सासुविधाया उपलब्धये लक्ष्मीकुट्टी सर्वसुविधा-सम्पन्नस्य चिकित्सालयस्य स्थापनायै कृतसंकल्पा वर्तते। बाल्यादेव यथा चिकित्साविषये तदैव अध्ययनस्य लेखनस्य च कृतेऽपि लक्ष्मीकुट्टी सावहिता दृश्यते। गहनवने निवसन्त्यपि सप्तवर्षीया बालिका लक्ष्मी-कुट्टी प्रथमा बालिका आसीत् या पञ्चक्रोशं यावत् पदातिः चलित्वा विद्यालयमगच्छत्। अध्ययनं प्रति उन्मुखाया लक्ष्मीकुट्टीमहाभागायाः क्रमोऽयं अद्याऽपि अविरतोऽस्ति। श्रीमती लक्ष्मीकुट्टी सम्प्रति 'केरल लोकसाहित्य अकादम्यां' शिक्षिकारूपेण कार्यं करोति। अध्ययनेन सह कवनकलाकौशलेऽपि लक्ष्मीकुट्टी अतिनिपुणा दृश्यते। लक्ष्मीकुट्टी महाभागायाः, कवनकौशलस्य सार्थतामनुभूय डी.सी. बुक्स इति प्रकाशनसंस्थया विदुष्याः कविताः प्रकाशिताः। आत्मनः सुखदस्य, समृद्धस्य, सुविकसितस्य जीवनस्य कृते लक्ष्मीकुट्टी स्वपत्युर्महतीं भूमिकां स्वीकरोति। तपःपूताया, कर्मशीलायाः पतिपरायणायाः सेवाभाविन्याः लक्ष्मीकुट्टीमहाभागायाः गुणैरभिभूतेन प्रधान-

**मन्त्रिणा नरेन्द्रमोदीमहोदयेन 'मन की बात' इति रेडियोकार्यक्रमे लक्ष्मीकुट्टीमहोदयायाः भूरि भूरि प्रशंसा कृता। नूनं गुणैरेव जनो गौरवमायाति।**

## हिन्दी अनुवाद

''रत्न किसी को खोजने नहीं जाता है उसे खोजा जाता है'' शास्त्र में वर्णित इन वचनों को प्रत्यक्ष करने वाली दक्षिण देश निवासी 'श्रीमती लक्ष्मी कुट्टी' घने जंगल में ताड़वृक्ष के पत्तों से निर्मित कुटिया में निवास करती हुई भी अपने असाधारण गुणों के बल से 2018 ई. में गणतन्त्र दिवस समारोह के अवसर पर 'पद्मश्री' जैसे दुर्लभ सम्मान से सम्मानित करने के लिए राष्ट्र की राजधानी दिल्ली नगरी में आमन्त्रित की गई। गुणों की खान लक्ष्मीकुट्टी ने सन् 1943 ई. में केरल प्रदेश के गहन वन में जन्म लिया। चिकित्सा सुविधाओं से अत्यन्त अभावग्रस्त इस वन में 'लक्ष्मीकुट्टी' एक 'दाई' के रूप में सेवा कार्य करती थी। आसपास के क्षेत्रों में प्रसव पीड़ा से पीड़ित नारियों की पीड़ा दूर करने के लिए सर्दी, गर्मी हो अथवा दिन रात्रि वह सदैव तत्पर रहती थी। इसी क्रम में चिकित्सा व्यवस्था के अभाव में वृक्षों की जड़, पत्ते, पुष्पादि से बनी हुई अनेक दवाओं से लक्ष्मी की माताजी प्रसव पीड़िता नारियों के कष्ट को दूर करती थी। माँ के पास सतत निवास करने से लक्ष्मी कुट्टी ने सहज में ही परम्परा से प्राप्त तथा अन्तर्दृष्टि से स्फुरित होने वाले ज्ञान से वन्य औषधियों को पहचाने में उनका निर्माण करने में निपुणता प्राप्त कर ली। लक्ष्मीकुट्टी की चिकित्साक्षेत्र में निपुणता के विषय में सुनकर आसपास के क्षेत्रों से रोगी चिकित्सा प्राप्त करने के लिए आते हैं। विशेषरूप से साँप के डसने से पीड़ित तथा अन्य विविध रोगों से पीड़ित व्यक्ति इलाज करवाने दूर दूर से आते हैं। सहृदया लक्ष्मीकुट्टी रोगियों का कष्ट हरने के लिए सदैव तत्पर रहती हैं। इस क्रम में पाँच सौ 500 रोगी लाभान्वित हो चुके हैं। तथा अभी तक निरन्तर औषधियों के शोध कार्य में संलग्न लक्ष्मीकुट्टी 500 पाँच सौ जड़ी बूटियों से निर्मित दवाओं के प्रयोग से रोगियों के इलाज करने की क्षमता रखती है। 'लक्ष्मीकुट्टी' के चिकित्सा कौशल से अभिभूत होकर केरल सरकार ने इन्हें 'नट्टू वैद्यरत्न' उपाधि से अलंकृत किया है। अपने नि:स्वार्थ सेवाभाव एवं दृढ संकल्पशक्ति से, ऋषि तुल्या 'लक्ष्मीकुट्टी' समीप के क्षेत्रों में 'वनामुधस्सी' अर्थात् जंगल की दादी नाम से आत्मीयता के भाव से पुकारी जाती है। निरन्तर सेवाकार्य में सलंग्न रहने पर भी 'लक्ष्मीकुट्टी' पूर्ण सन्तुष्ट नहीं हैं। वनवासियों को सर्वसुविधा उपलब्ध कराने के लिए कृतसंकल्प है। चिकित्सालय के निर्माण के लिए कृतसंकल्प है। चिकित्सा के क्षेत्र में लक्ष्मीकुट्टी बाल्यकाल से जितनी निपुण है अध्ययन एवं लेखन के प्रति भी पूर्ण सजग है। घोर जंगल में रहने पर भी पढ़ने के लिए उत्सुक बालिका लक्ष्मी पहली बालिका है जो पाँच कोस पैदल चल कर सात वर्ष की उम्र में विद्यालय जाती थी। अध्ययन के प्रति उन्मुख लक्ष्मीकुट्टी महोदया का यह क्रम आज भी सतत गति से प्रवहमान है। श्रीमती लक्ष्मीकुट्टी आजकल केरल लोक साहित्य अकादमी में शिक्षिका के पद पर कार्य कर रही है। अध्ययन के साथ-साथ कविता लिखने में भी लक्ष्मीकुट्टी अति निपुण हैं। 'लक्ष्मीकुटी' की कविताओं की रोचकता एवं सार्थकता से अभिभूत होकर डी.सी. बुक्स नामक प्रकाशन संस्था ने इनकी कविताओं का प्रकाशन किया है। अपने सुखद, समृद्ध एवं सुविकसित जीवन के लिए लक्ष्मी अपने पति की महती भूमिका स्वीकार करती है। तप:पूता कर्मशीला, परिपरायण एवं सेवाभाविनी लक्ष्मीकुट्टी के गुणों से अभिभूत प्रधानमंत्री श्री नरेन्द्र मोदी महोदय के द्वारा मन की बात कार्यक्रम में इनकी भूरि भूरि प्रशंसा की गई है। निश्चय ही गुणों से ही मानव गौरव प्राप्त करता है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# अनुपस्कृतविद्यो भवेदाचार्यः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वर्तमानकाले समुपलब्धेष्वायुर्वेदग्रन्थेषु चरक-संहितायाः सुश्रुतसंहितायाश्च प्रचलनं विशेषेण वर्तते। तत्र बहुविधानां विशिष्टानां शब्दानां पदानां वा प्रयोगो विहितः। अत्र चरकसंहितायां प्रयुक्तस्यैकस्य पदस्य वर्णनं विधीयते। मूलतः ''अग्निवेशतन्त्रम्'' इतिनाम्ना प्रसिद्धे वर्तमानकाले च ''प्रति-संस्कृतस्वरूपे प्रसिद्धे'' इतिनामकेग्रन्थे ''अनुपस्कृतविद्यः'' इत्यस्य पदस्य प्रयोगो विहितः, प्रयोगोऽयं मूलतन्त्रकारेण अग्निवेशेन प्रतिसंस्कर्त्रा चरकेण व्याख्याकारेण चक्रपाणिना वा कृत इति तु कथयितुं दुःशकं-वर्तते, किन्तु वर्णनीयो वर्तते ह्येषः विशिष्टः पदः।**

वर्तमानकाल में उपलब्ध आयुर्वेद के ग्रन्थों में चरकसंहिता और सुश्रुतसंहिता का प्रचलन विशेष रूप से है। वहाँ बहुविध विशिष्ट शब्दों या पदों का प्रयोग किया गया है। यहाँ चरकसंहिता में प्रयुक्त एक पद का वर्णन किया जा रहा है। मूलतः ''अग्निवेशतन्त्र'' इस नाम से प्रसिद्ध और वर्तमान काल में प्रतिसंस्कृत स्वरूप में प्रसिद्ध ''चरकसंहिता'' नामकग्रन्थ में ''अनुपस्कृत-विद्यः'' इस पद का प्रयोग किया गया है, यह प्रयोग मूलतन्त्रकार अग्निवेश के द्वारा, प्रतिसंस्कर्ता चरक के या व्याख्याकार चक्रपाणि के द्वारा किया गया है ऐसा कहना कठिन है, किन्तु यह विशिष्ट पद वर्णनीय है।

**आयुर्वेदस्य ज्ञानं सरलतया न भवति। दुस्तरे ह्यस्मिन्नायुर्वेदे कठिनतमस्य उद्यमस्य आवश्यकता वर्तते। चरकसंहितायाः प्रतिसंस्कर्ता आचार्यः चरकः निर्दिशति यत् ''न चैव ह्यस्ति सुतरमायुर्वेदस्य पारं, तस्मादप्रमत्तः शश्वदभियोगमस्मिन्गच्छेत्, एतच्च कार्यम्, एवम्भूयश्च वृत्तसौष्ठवमनसूयता-परेभ्योऽप्यागमयितव्यं, कृत्स्नो हि लोको बुद्धिमता-माचार्यः शत्रुश्चाबुद्धिमताम्, अतश्चाभिसमीक्ष्य बुद्धिमताऽमित्रस्यापि धन्यं यशस्यमायुष्यं पौष्टिकं-लौक्यमभ्युपदिशतो वचः श्रोतव्यमनुविधातव्यं चेति।''(च.वि. 8/14)**

आयुर्वेद का ज्ञान सरलता से नहीं होता है। आयुर्वेद का पार पाना (अन्त तक समझ पाना) सुतर(सुगम) नहीं है इसलिए प्रमादरहित निरन्तर अध्ययन का प्रयत्न (अभियोग) इसमें करना चाहिए और यह (मेरे द्वारा निर्दिष्ट, गुरु द्वारा निर्दिष्ट) करना चाहिए (अर्थात् यह करणीय है) और पुनः इस तरह ईर्ष्या रहित दूसरों से भी आचरण की सुन्दरता (श्रेष्ठता) को इसी तरह जान लेना चाहिए क्योंकि बुद्धिमान् पुरुषों के लिए समस्त संसार गुरु और तथा मूर्ख पुरुषों के लिए समस्त संसार शत्रु है, इसलिए ठीक तरह से सोच-समझकर बुद्धिमान् व्यक्तियों को शत्रु के द्वारा भी धन्य, यशोवर्धक, आयुर्वर्धक, पुष्टिकारक, लोकहितकारक किये जाते हुए उपदेश को सुनना चाहिए और पालन करना चाहिए।

**तत्र ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नेना-कोपनेनानुपस्कृतविद्येनानूसयकेनानुनयेनानुनयको-विदेन क्लेशक्षमेण प्रियसम्भाषणशीलेन छात्रेण सर्वदा शश्वत् परिश्रमोऽनुविधातव्यः। दुस्तर-स्यायुर्वेदस्याध्यापन आचार्योऽपि दक्षः (अवाम-बुद्धिः) दक्षिणः पर्यवदातश्रुतः जितहस्तः प्रकृतिज्ञः प्रतिपत्तिज्ञोऽनसूयकश्च भवेत्।**

ज्ञान विज्ञान, वचन, प्रतिवचन की शक्ति से सम्पन्न, क्रोध न करने वाले, अनुपस्कृतविद्य, अनसूयक, अनुनय वाले, अनुनयकोविद, क्लेश को सहन करने में सक्षम, प्रिय सम्भाषण करने वाले छात्र के द्वारा सर्वदा निरन्तर परिश्रम किया जाना चाहिये। दुस्तर आयुर्वेद का अध्यापन करने वाला आचार्य भी दक्ष (अवामबुद्धि),

दक्षिण, पर्यवदातश्रुत (विशुद्ध ज्ञान को सुना हुआ अर्थात् उससे युक्त), जितहस्त, प्रकृति को जानने वाला, प्रतिपत्ति को जानने वाला (तत्काल करणीय कर्म को जानने वाला) और अनसूयक (ईर्ष्या नहीं करने वाला) होना चाहिए।

**चरकसंहितायां प्रसङ्गेऽस्मिन् पदद्वयस्य प्रयोगः आचार्यस्य विशिष्टस्याभिप्रायस्य द्योतको वर्तते। एकं पदं वर्तते ''प्रतिपत्तिज्ञः'' अपरञ्च पदं वर्तते ''अनुपस्कृतविद्यः।'' भिषजि प्रतिपत्तिज्ञत्वमावश्यकरूपेण भवेदिति। प्रतिपत्तिपदस्य विश्लेषणम् आयुर्वेदे चास्य प्रयोगवैशिष्ट्यमपरस्मिंल्लेखे स्पष्टं करिष्यामि। अत्र तु ''अनुपस्कृतविद्यः'' अस्य पदस्य विश्लेषणं प्रस्तूयते -**

चरकसंहिता में इस प्रसङ्ग में दो पदों का प्रयोग आचार्य के विशिष्ट अभिप्राय का द्योतक है। इस पर ''प्रतिपत्तिज्ञ'' है और दूसरा पद ''अनुपस्कृतविद्य''है। भिषक् में प्रतिपत्तिज्ञत्व आवश्यक रूप से होना चाहिए। प्रतिपत्ति पद का विश्लेषण और आयुर्वेद में इसका प्रयोगवैशिष्ट्य दूसरे लेख में स्पष्ट करूँगा। यहाँ तो ''अनुपस्कृतविद्यः'' इस पद का विश्लेषण प्रस्तुत किया जा रहा है-

**आचार्ये विशेषेणानुपस्कृतविद्यत्वं तु परमावश्यकम्। अत्र व्याख्याकारः चक्रपाणिः अनुपस्कृतविद्यात्मकं पदं स्पष्टयति यत् ''अनुपस्कृतविद्यः इति शास्त्रान्तरज्ञानेन नास्त्येव उपस्कृता विद्या यस्य स तथा, य आयुर्वेदज्ञः सन् शास्त्रान्तरेणापि संस्कृतो भवति स तु नितरामुपादेयः''(च.वि. 8/4 चक्रपाणिः)**

आचार्य में विशषरूप से अनुपस्कृतविद्यत्व तो परमावश्यक है। यहाँ व्याख्याकार चक्रपाणि अनुपस्कृतविद्य पद को स्पष्ट करते हैं कि अनुपस्कृतविद्य अर्थात् शास्त्रान्तरज्ञान से जिसकी विद्या उपस्कृत (विकृत) न हो, वह ऐसा हो, जो आयुर्वेदज्ञ होता हुआ अन्य शास्त्रों से भी संस्कृत (परिष्कृत ज्ञानयुक्त) होता हो वह तो अधिक उपादेय है। (चक्रपाणि)

**कृञ् हिंसायाम्, कृञ् करणे इति धातुद्वयस्य भिन्नार्थकाः प्रयोगाः वर्तन्ते। अत्र उपपूर्वकस्य कृ इति धातुद्वयस्य भूषणे समवाये वैकृते वाक्याध्याहारेषु च प्रयोगाः अवलोकनीयाः-**

**''उपात्प्रतियत्न-वैकृत-वाक्याध्याहारेषु'' (6/1/139) इत्यस्य सूत्रस्य विवृतिलेखनप्रसङ्गे विवृतिकारः आचार्यः विश्वनाथशास्त्री प्रभाकरः विवृणोति मध्यकौमुद्याम् यत्-**

**.....उपस्कृता कन्या (अलङ्कृता कन्या इत्यर्थः), उपस्कृताः ब्राह्मणाः (सङ्घीभूताः ब्राह्मणाः इत्यर्थः), एधोदकस्योपस्कुरुते (एधः काष्ठं, दकस्य जलस्य उपस्कुरुते=गुणान् आधत्ते=गृह्णाति इत्यर्थः), उपकृतं भुङ्क्ते (विकृतं भुङ्क्ते), उपस्कृतं ब्रूते (वाक्याध्याहारपूर्वकं ब्रूते इत्यर्थः)**

हिंसा अर्थ वाली कृञ् तथा करने के अर्थ में कृञ् इन दो धातुओं के भिन्न-भिन्न अर्थ वाले प्रयोग हैं। यहाँ उप उपसर्गपूर्वक दोनों कृ धातुओं के भूषण, समवाय, वैकृत और वाक्याध्याहार में प्रयोग अवलोकनीय हैं-

''उपात्प्रतियत्न-वैकृत-वाक्याध्याहारेषु'' (6/1/139) इस सूत्र की विवृतिलेखन के प्रसङ्ग में विवृतिकार आचार्यविश्वनाथशास्त्री प्रभाकर मध्यकौमुदी में वर्णन करते हैं कि -

.....उपस्कृता कन्या (अर्थात् अलङ्कृता कन्या), उपस्कृत ब्राह्मण (अर्थात् सङ्घीभूत ब्राह्मण), एधोदकस्योपस्कुरुते (अर्थात् एध=काष्ठ, दक = जल को उपस्कृत करते हैं = गुणों को आधान = ग्रहण करते हैं), उपस्कृतं भुङ्क्ते (अर्थात् विकृत खाता है, उपस्कृतं ब्रूते (अर्थात् वाक्याध्याहारपूर्वक बोलता है)।

**उपस्कर पु. उप + कृ-भावे अप हिंसने सुट्। हिंसने उपस्करोति उप + कृ-अच् भूषणे समवाये**

**प्रतियत्ने विकारे अध्याहारे च सुट्।......विकृते अध्याहारे च ( वाचस्पत्यम् )**

उपस्कर– यह पुंल्लिंग पद है, उप उपसर्ग पूर्वक+कृ धातु से भाव में अप् होने पर हिंसन अर्थ में सुट् आगम होता है। हिंसन अर्थ में उपस्कार करता है (हिंसा करता है)। उप उपसर्गपूर्वक + कृ धातु से अच् होने पर भूषण, समवाय, प्रतियत्न, विकार और अध्याहार में सुट् आगम हुआ है। .......। (वाचस्पत्यम्)।

**उपस्कृतः इत्यस्यार्थः संस्कृतः विकृतः विभूषितश्च वर्तते, किन्तु व्याख्याकारेण चक्र-पाणिना त्वस्यार्थः विकृतः इति गृहीतः। अत्र तु ''विकृतः'' इत्यर्थ एवाभिप्रेतः। प्रकारान्तरेणाचार्यः संकेतयति यत् तस्मिन् काल आयुर्वेदाध्ययनार्थिनां कृते संस्कृतव्याकरण-संस्कृतसाहित्य-ज्योतिष-दर्शन-उपनिषदित्यादीनां विभिन्नानां विषयाणाम् ज्ञानमावश्यकमासीत् किन्तु तैरस्यायुर्वेदाध्ययने विकृतिर्न भवेत्। वर्तमानकालेऽप्यायुर्वेदाध्ययन-क्रमे संस्कृतव्याकरण-संस्कृतसाहित्य-ज्योतिष-दर्शन-फिजिक्स-केमिस्ट्री-जूलोजी-एलोपेथी-आंग्लभाषेत्यादीनां विभिन्नानां विषयाणां ज्ञानमपेक्षितं वर्तते किन्तु तैरस्य आचार्यस्य ( शिक्षकस्य ) आयुर्वेदज्ञाने काचिद् विकृतिर्न भवेदित्याचार्यस्याभिप्रायो वर्तते।**

उपस्कृत इस अर्थ संस्कृत, विकृत और विभूषित है, किन्तु व्याख्याकार चक्रपाणि के द्वारा तो इसका अर्थ विकृत किया गया है। यहाँ तो ''विकृत'' यह अर्थ ही अभिप्रेत है। अन्य प्रकार से आचार्य संकेत करते हैं कि उस काल में आयुर्वेद का अध्ययन करने की इच्छा वाले विद्यार्थियों के लिये संस्कृतव्याकरण-संस्कृतसाहित्य-ज्योतिष-दर्शन-उपनिषद् इत्यादि विभिन्न विषयों का ज्ञान आवश्यक होता था किन्तु उनसे आयुर्वेद के अध्ययन में विकृति नहीं होनी चाहिये। वर्तमानकाल में भी आयुर्वेद के अध्ययनक्रम में संस्कृत व्याकरण-संस्कृतसाहित्य-ज्योतिष-दर्शन-फिजिक्स-केमिस्ट्री-जूलोजी-एलोपेथी-आंग्लभाषा इत्यादि विभिन्न विषयों का ज्ञान अपेक्षित है, किन्तु उनसे आचार्य (शिक्षक) के आयुर्वेदज्ञान में कोई विकृति नहीं होनी चाहिये यह आचार्य का अभिप्राय है। (उस ज्ञान से लाभ ही लेना चाहिये)।

**चरकसंहितायाः व्याख्याकारेण योगीन्द्रनाथ-सेनमहाशयेन स्पष्टीकृतं यत् अनुपस्कृतविद्यमित्यत्र पाठान्तरमपि विद्यते। सः कथयति ... ''उपस्कृता शास्त्रान्तरज्ञानेन संस्कृता विद्या येन तम् ( उपस्कृतविद्यम् )। अनुपस्कृतविद्यमिति पाठे तु अविकृतविद्यम्। ''विकारे सुट्'' ( योगीन्द्रनाथ सेन )।**

**अत एव चरकसंहितायाम् अनुपस्कृतविद्यः ( शास्त्रन्तरज्ञानेन सुसंस्कृतः सुसमृद्धः ) भवेदाचार्यः ( शिक्षकः ) इति संहिताकारस्य व्यख्याकाराणाञ्च आशय इति।**

चरकसंहिता के व्याख्याकार योगीन्द्रनाथसेन महाशय के द्वारा स्पष्ट किया गया है कि अनुपस्कृतविद्य यहाँ पाठान्तर भी विद्यमान है। वे कहते हैं – ''उपस्कृत अर्थात् शास्त्रान्तर ज्ञान के द्वारा विद्या संस्कृत हो वह उपस्कृतविद्य है। अनुपस्कृतविद्य इस पाठ के होने पर तो अविकृतविद्य यह अर्थ है। यहाँ विकार अर्थ में सुट् आगम हुआ है।'' (योगीन्द्रनाथ सेन)।

इसलिए ही चरकसंहिता में अनुपस्कृतविद्य और उपस्कृतविद्य इन दोनों वाक्यों का प्रयोग व्याकरण के अनुसार सुशुद्ध (पूर्णतया शुद्ध) है। अनुपस्कृतविद्य (अर्थात् शास्त्रान्तरज्ञान के द्वारा सुसंस्कृत अर्थात् सुसमृद्ध) आचार्य (शिक्षक) होना चाहिए यह संहिताकार और व्याख्याकारों का आशय है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20


हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in



स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः


प्रतिष्ठायाम्,